रिक्तत्वस्यानुमितिविषयत्वे स्वविषयताव्यापकत्वपर्यवसितत्वादिति भावः यद्यपि समस्तालंबनात्मकपर्वतपदकवह्निविधेयकानुमितिविषयताया विशेषप्रतिपत्तिपर्वतो
वह्निमानितिप्रतिज्ञामात्रजन्यबोधायान्नताद्दृशानुमितिविषयतासमनियतविषयताको चावयान्तरसहिततज्जन्यसमस्तालंबनबोधजनकत्वं किंचिन्नानविषयवत्त्वस्य तादृश
वनत्वाद्युपपत्तिस्यात् किंचित्प्रकृतानुमितिव्यक्तिविषयतासमनैयत्यस्य विवक्षणेऽपि च तिगमनाद्यतिव्याप्तिः पूर्वैरेव तज्जन्यबोधस्यापि पर्वतो वह्निमान् धूमज्ञानज्ञाप्यवह्नि
मांश्चेत्याकारकसमस्तालंबनानुमितिविषयतासमनियतविषयताकत्वात् तथापि प्रकृतपक्षकप्रकृतसाध्यव्याप्यवत्तापरामर्शत्वावच्छिन्नजनकतानिरूपितजन्यताव
च्छेदकविषयतान्वेन स्वविषयतासमनैयत्यस्य तत्त्वस्य विवक्षितत्वान्न दोषः न त्वेवं सम्मुक्तस्य लीयोपनयेऽतिव्याप्तिः तज्जन्यबोधस्यापि विम्बविषयकत्वेन तथाविधानुमिति
विषयतासमनियतविषयताकत्वादित्यतो विषयतापदस्य प्रकारतापरत्वाभिप्राये एतान्यथा तदर्थं निर्वक्ति प्रकृतेनेति ताद्दृशोपनयजन्यबोधे प्रकारीभवन्तोऽभाववत्त्वादेस्ता
द्दृशानुमितावप्रकारत्वात्तत्प्रकारतायाः समनैयत्याभावमिति नातिव्याप्तिरिति भावः सकलाभिधेयपर्णवदिदं द्रव्यमितिप्रतिज्ञाजन्याताद्दृशानुमितावितरस्य लीयोपनयजन्य
बोधे विम्बस्येवाभिधेयत्वेन प्रकारतया तत्प्रकारतायाः समनैयत्यमक्षतमेवेति भवत्यतिव्याप्तिरिति भावः ननु विशेषणानवच्छिन्नप्रकारतानां समनैयत्यं विवक्षणीय
मतो नातिव्याप्तिः उपनयजन्यबोधे भाववत्त्वादीनां ताद्दृशप्रकारतासत्त्वात्तु तत्वनुमितेस्ताद्दृशप्रकारतायाश्च तत्रासत्त्वादित्यतोऽनुमितावपि तेषां तथाविधप्रकारतावच्छेदनाय
स्यलांतरेऽतिव्याप्तिमाह सकलाभिधेयेति अत्राभाववत्प्रतियोगित्वत्वादीनां स्वरूपतः पक्षतावच्छेदकत्वादुद्भवति तथानुमितिरिति भावः द्रव्यमिति विपरीतकोटिप्रसि

द्यर्थविशिष्टपक्षबोधइति उपनयस्थेदंपदेन विशेष्यमात्रपरामर्शेऽस्तु न विषयकत्वेन संभवतीति भ्रमनिराकरणाय व्यभिचारीरे साधनसाध्यप्रकारे ऐवावान्तदपि कर
णान्तर्भावः न तत्त्वधिकरणत्वेनापीत्यनुमितौ न तस्य तत्त्वस्य वा स्वरूपतः प्रकारत्वविरहेपि नासंगतिः हेतुरप्यत्रेदंत्वसमवायेन द्रव्यमेव वा बोध्य गुणादेस्तथात्वे हेत
तावच्छेदकगुणत्वादेः स्वरूपतउपनयजन्यबोधे भाने कथितप्रकारतासमनैयत्यानुपपत्तेः नचाभेदेन विषयतासमनैयत्यं साकावनुमितिविषयतात्वसमनियत
तत्त्वविषयतात्वकत्वोक्तौ वानायं दोष इति वाच्यं हेत्वर्थहृदिताच्छेदकप्रतिज्ञाहृदितत्वायोन्तर्गतो तु हेतुजन्यबोधविषयतायामनुमितिनिरूपितविषयतात्वाभावादनुमि
तिविषयतात्वव्याप्यविषयताकत्वाभावाद्देव तादृशबोधवारणसंभवेनास्तु न विषयताकत्वाशेषपर्यायपत्तेः न हि साध्यतावच्छेदकावच्छिन्नसाध्यविशिष्टप्रकृत
पक्षतावच्छेदकावच्छिन्नविषयतावद्धर्मभूतविषयतात्वानुमितिनिरूपिताः समूहालम्बनानुमितिनिरूपितत्वमादाय नातिप्रसंगावकाशः प्रकृतपरामर्शजन्य
न्यतावच्छेदकविषयतात्वस्यैव निवेशनीयत्वात् अस्य यः संभवायानात् उत्तउपनयविशेषणतिव्याप्त्यभिधानेन चोपलक्षणपरमस्तु न विषयके त्यस्य निरुक्तार्थ
कत्वे सर्वस्मात्कालत्ववान यकालपरिमाणवान् सर्वस्मादित्यत्र हेत्ववयवेनाप्यतिव्याप्तिर्बोद्ध्या तज्जन्यबोधविषयताया विश्ववृत्तित्वेनानुमितिविषयताव्या
पकत्वादेव तादृशान्स्तु न विषयकत्वस्य किं चिज्जन्यतानवच्छेदकत्वेन तदवच्छिन्नजन्यताविवक्षणासंभवेन प्रतिज्ञाहेतुजन्यसमूहालम्बनबोधमादाय तन्निष्ठहे
त्वर्थविषयकत्वावच्छिन्नजन्यतानिरूपितजनकताश्रये धूमादालोकवान्सर्वतो वह्निमान्स्मादित्यादौ हेत्ववयवेऽप्यतिव्याप्तिर्दुर्वारा तस्मात्प्रनवच्छिन्नप्रका
रताकत्वविवक्षयापि वारणसंभवादित्यपि बोध्यं तद्दोषवारणाय प्रथमतोऽनुमित्यन्तर्न विषयकत्वमन्यथानिर्वाक्ति तथापि प्रकृतेति एतद्रूपपक्षतावच्छेद
कविशिष्टसाध्यकतदनुपादाने प्रमेयाद्याच्छतवान यप्रमेयः प्रमेयादित्यादौ हेत्ववयवेऽपमिद्धर्मावच्छिन्नबोधोपादानेपि घटत्वावच्छेदघटान्यतरस्मान्नघटान्य

गदा॰
अवयव॰
१२

त्ववन्तधर्मीयघटो घटोत्पत्ववानित्याकारिकायाः सामानाधिकरण्यसंबन्धेन घटान्यत्वसाध्यकप्रतिज्ञातद्घटितन्यायांतर्गतेनैरूप्यघटान्यतरत्वावच्छिन्नाशेषसामानाधिकरण्यसं
बंधेन विशेषणतापन्नाघटान्यत्वघटितताहृशसंबंधावच्छिन्नहेतुताकविशिष्टान्यतरस्य हेतुप्रतियोगिके हेत्ववयवेऽतिव्याप्तिः घटत्वादौ सामानाधिकरण्यसंबन्धेन
रूपवत्तिव्यभिचारवारकतया घटान्यत्वात्मकविशेषणस्य पार्थक्येऽपि भेदनविशेष्यस्य घटान्यत्वसमानाधिकरणसत्तासत्तासमानाधिकरणो घटरूपादौ व्यभिचारवारकतया वि
शेष्यतावच्छेदकस्य सार्थकत्वमित्यवधेयं सामानाधिकरण्यसंबंधस्य हेतुनियामकतया व्यापकत्वाघटकत्वेपि गगनेनतिसंतिसद्व्याहृतियर्मस्य सत्वात् वह्निमान्पर्वतो ना हृ
तिधर्मस्यत्वादालोकवान्पर्वतो वह्निमान् वह्निमत्पर्वतावृत्तिधर्मस्यत्वादित्यादौ हेत्ववयवेऽतिव्याप्तिवारणाय पक्षतावच्छेदकवैशिष्ट्यनिवेशनमावश्यकं अत्रंवृद्धा
भाव घटकतया हेत्ववयव ऽकद्वय त्वपर्वतत्वादीनामवैयर्थ्यं साध्यतावच्छेदकविशिष्टसाध्यनिवेशनप्रयोजनमाह पंचम्यर्थेति हेत्ववमेयाहाचत्ववत्प्रमेयादित्यादौ हे
तुत्ववोधस्याविभक्त्यर्थहेतुत्वे प्रमेयाघात्मकप्रकृत्यर्थवैशिष्ट्यावगाहित्वेपि प्रकृत्यर्थसाध्यतावच्छेदकविशिष्टवैशिष्ट्यानवगाहित्वान्नातिव्याप्तिरित्यर्थः पक्षतावच्छेद
कावच्छिन्नविशेष्यतानिरूपितसाध्यतावच्छेदकावच्छिन्नप्रकारताकत्वमेव पर्यवसितार्थः संबंधविशेषश्चैतद्दलेन प्रवेश्यः प्रयोजनविरहात् अतः पंचम्यर्थप्रकृत्यर्थयोस
याहृशसंबंधेनान्वयस्तस्य वृत्तिनियामकतया व्यापकत्वाघटकत्वेपि नैतद्व्यावृत्त्यसंगतिः यदि च जन्यायह्विषयत्वरूपपंचम्यर्थैकदेशेजन्यत्वे प्रकृत्यर्थस्य हेतुज्ञानस्या
न्वयः तत्र परंपरासंबन्धेन ताहृशविषयत्वेनहाजन्यत्वपक्षकोक साध्यहेतुकस्थले व्याहृत्तिर्वाच्या पक्षमुख्यविशेष्यकत्वपर्यन्तानिवेशात् न ताहृशविषयत्वत्वावच्छि
न्नपक्षकस्थले हेतुजन्यबोधस्य ताहृशविशिष्टपक्षेऽशतः वैशिष्ट्यानवगाहित्वात्ताहृशविषयताविलक्षणेति साध्यतावच्छेदकसंबन्धावच्छिन्नसाध्यतावच्छेदकावच्छि
न्नप्रकारतानिरूपितपक्षतावच्छेदकावच्छिन्नविषयताविलक्षणेत्यर्थकं तद्विलक्षणत्वं च न तद्भिन्नत्वं प्रतिज्ञाजन्यबोधीयसाध्यादिविषयतायास्तद्भिन्नत्वेनासंभवापा

तात् तादृशविषयताभिन्नमुख्यविशेष्यतासम्बन्धेन निवेशेनासंभवो ऽत एव निगमनातिव्याप्तिनादवस्थ्याद् अन्यन विषयकत्वदलं वैयर्थ्यापत्तेः स्मृत्यादावालोकवान्पर्वतो व
ह्निमान् धूमादित्याद्यो हेत्ववयवजन्यबोधीयहेतुतानिरूपमुख्यविशेष्यतायास्तादृशविषयताभिन्नत्वात् एतेन तादृशविशिष्टविषयतानेतः प्रातिस्वप्रकृतपरामर्शजन्य
तानवच्छेदकत्वं वा तादृशमपि निरस्तं प्रालोकाद्यंशे हेतुत्वप्रकारताया एव तादृशविषयतात्वेनः प्रातीतात्म्यकृतपरामर्शजन्यतावच्छेदकत्वाद्वह्नेतुजन्यबोधीयतद्विषयता
याश्च तथात्वात् न च तथापि विषयविषयतावच्छेदककोटौ धर्मावच्छिन्नविषयतासम्बन्धेन निवेशात् दोषश्चापि साधुः एतत्रमभेयसामान्यस्यपक्षतावच्छेदकादिविघटकतातादृशविष
यतावच्छेदककोटिप्रविष्टप्रसिद्धेः विलक्षणावच्छेदकतानिवेशोपि व्यर्थः स्वप्रधूमादालोकवान्वेतो वह्निमान्धूमादित्यादिमापान्नौ तत्त्रिगमनादाववतिव्याप्तेः तत्तु
न्यबोधविषयतावच्छेदकधूमत्वादेस्तादृशविषयतावच्छेदककोटिप्रविष्टत्वनियमादपि तु तादृशविषयताशालित्वनिश्चयत्वावच्छिन्नानिवर्त्यसंशयनिवर्तकतावच्छेद
कत्वमेव तत् निगमनादिजन्यबोधीयज्ञानज्ञाप्यत्वादिविषयतायास्तादृशनिश्चयत्वावच्छिन्नानिवर्त्यज्ञानज्ञाप्यत्वादिसंशयप्रतिबन्धकतावच्छेदकतायास्तदारणाउक्त
हेत्ववयवजन्यबोधनिवर्त्यस्य हेतुत्वधूमीयेन वेत्याद्दिसंशयस्य धूमादिज्ञानज्ञाप्यत्वघटितपक्षतावच्छेदकावच्छिन्नपक्षकस्यतावच्छेदकावच्छिन्नप्रकारकनिश्चयनिव
र्त्यतया तादृशबोधीयविषयताया न तथात्वं विधेयविषयताविलक्षणानि समस्तपदस्याहृत्तिसंगतिः सर्वेषामेव संशयानां स्वविरोधिविषयकत्वं तथाविधेयविषयताशालित्वस्य
लेवन निश्चयनिवर्त्यतयानादृशानिश्चयानिवर्त्यस्याशिसंशयस्याप्रसिद्धिरतस्तादृशीति निश्चयत्वावच्छिन्नेति उक्तंचापि कथं वाग्गमनानपि निगमनजन्यबोधेसाध्यतावच्छेदका
वच्छिन्नसाध्यविशिष्टपक्षतावच्छेदकावच्छिन्नपक्षविषयकत्वस्याततनयास्मृतज्ञानज्ञाप्यत्वादिसंशयस्यतादृशविषयताशालिनिश्चयानिवर्तनीयत्वादुपपत्ति विनापि तमा
हितं ध्रुवकिन्त्वनुमन्तृनवृत्तिव्यापकत्वपर्यवसिततमतो ज्ञानज्ञाप्यत्वस्मृत्यादेनवेति संशयनिरूपितप्रतिबन्धकतायाः स्मृतज्ञानज्ञाप्यत्वातिरिक्तप्रतिज्ञाप्रतिपाद्यमागविष
यताघटितत्वे धर्मसहरूपं संवेयरूपावच्छेदकत्वविरहेपि नास्तत्पदव्याहेतुसंगतिः प्रमाणपदज्ञानालङ्कृतस्य निगमनादिजन्यबोधस्य संशयाप्रतिबन्धकतया तज्ज्ञान
कत्वमादाया तिप्रसंगस्य वारणाय तादृशसंशयानिवर्तकत्वमुपेक्षात निवर्तकतावच्छेदकविषयतासम्बन्धेन बोधो विशेषितः पक्षतावच्छेदकाद्यनिवेशे तदनवच्छिन्नप

दादिविषयताशालिनिश्चयसमुदायस्यैकमपि संशयं प्रत्यप्रतिबन्धकतया तादृशनिश्चयत्वावच्छिन्ननिवर्त्त्याप्रसिद्धिरतस्तन्निवेश इति । इत्थं चानतिरिक्तविषयकत्वघटकसाध्यताव
च्छेदकावच्छिन्नसाध्यविशिष्टपक्षतावच्छेदकावच्छिन्नविषयतायास्स्वनिष्ठत्वनिवेशनेनैव तन्न्यूनविषयकदर्शितहेतुजन्यबोधवारणसंभवे पृथगन्यूनविषयकत्वविशेषणमनर्थ
कमिति चेत्सत्यमाहितेतादृशविषयतायाः स्वनिष्ठत्वविशेषणेन निगमनादिजन्यबोधस्य ज्ञानत्वाप्यत्वविशेषितसाध्यविशिष्टपक्षताविषयताशालिनिश्चयत्वव्यापकप्रतिबन्धक
ताकज्ञानज्ञाप्यत्वादिसंशयास्य संशयाप्रतिबन्धकतयाऽनतिरिक्तविषयकत्वापत्तेर्दुर्वारतास्तन्मतसन्न्यायावयवत्वमर्थः निगमने क्षिपद्वाचकपदमनुपपन्नमिति तद्वारणम
नतिरिक्तपदप्रयोजनमिति मतमनुसृत्य लघुशरीरमनतिरिक्तविषयकत्वं निर्वक्ति प्रकृतेति प्रकृतहेतुकाया प्रकृतसाध्यसिद्धेरौपयिकी या व्याप्तिस्तदविषयकत्वमित्यर्थः यद्रूपा
वच्छिन्नविशेषितप्रकृतहेतुतावच्छेदकावच्छिन्नहेतुविशिष्टप्रकृतपक्षतावच्छेदकावच्छिन्नविषयकनिश्चयत्वप्रकृतसाध्यतावच्छेदकावच्छिन्नसाध्यकानुमितिजनकतानति
रिक्तवृत्ति तद्रूपावच्छिन्नाविषयकत्वमिति तु पर्यवसितं तादृशं च रूपं तद्धेतुतावच्छेदकावच्छिन्नताविशिष्टहेतुपरतया न जन्यबोधस्य तादृशरूपावच्छिन्नविषयकत्वान्नातिव्याप्तिः
अन्वयव्यतिरेकव्याप्त्याविशिष्टैकतरनिवेशेऽन्वयिनि व्यतिरेकिणो वा निगमने तिव्याप्तिरिति निरुक्तरूपावच्छिन्नत्वेन द्वयोरनुगमः यदि च यत्तत्त्वयोर्निवेशान्नानुगम इति विभा
वते तदाभावद्वयमेव वा बोधे निवेशनीयं प्रतल्लाभायैव चौपयिकान्तमिति ध्येयं यद्यप्युदाहरणजन्यबोधस्य न निरुक्तरूपावच्छिन्नविषयकत्वं तथापि सिसाधयिषाधीनन्यायप्रयो
ज्यत्वानुपगमेन पक्षतावच्छेदकविशिष्टे साध्यतावच्छेदकविशिष्टवैशिष्ट्यावगाहित्वरूपान्यूनविषयकत्वविरहादेव नातिप्रसङ्गः हेत्वन्तर्भावे च तत्सत्ताभावान्नातिव्याप्तिरित्यवधेयमव
च्छिन्नाप्तिविशिष्टस्यालोकस्य पर्वतत्वावच्छिन्नविशेषणत्वेन त्र विशिष्टोऽपि पर्वते तेन च्छेनेरर्थतो लाभेनार्थतस्तत्र प्रकृतपक्षे प्रकृतसाध्यगमकतालाभान्न हेत्ववयवाभिधानप्रयोजनका
ङ्क्षावसर इत्यतः स्वयमेति तस्याः प्रतिज्ञायाः नन्वेवमपि यत्र प्रकृते हेतुकप्रकृतसाध्यकव्याप्तिरेवात न भवति पक्षत्वमप्येतत्र तत्र प्रतिज्ञायास्संशयहरत्वाशङ्कामपरिहरति वह्नीति विशि
ष्टपक्षेति पक्षतावच्छेदकविशिष्टपक्षेत्यर्थः तादृशव्याप्तीति प्रकृतसाध्यसिद्ध्यौपयिकव्याप्तीत्यर्थः यद्यपि विशिष्टपक्षोपस्थापकपदात्प्रकृते हेतौ विशिष्टपक्षवृत्तित्वस्याप्यर्थतः
प्रतीत्या पक्षतयादिप्रयोजकाकाङ्क्षाया अप्यनवकाशस्तथापि धूमवत्त्वस्याने धूमवत्त्वायम्यतिव्याप्तत्तस्वासंभव इत्युदाहरणमात्रोपादाने अन्यथाऽऽकाङ्क्षादिविरहेऽप्यभिधानेऽतिप्रसङ्गात्

हेतुघटयादेरप्यभिधानप्रसंगात् अत एवानाकांक्षिताभिधानादेव पक्षस्य पक्षन्यायप्रयोगदृष्टान्तोऽप्यव्यापीति अन्वयव्यतिरेकव्याप्तिद्वयेऽसमर्थः व्याप्तिद्वयसत्त्वेऽन्ये चाभिधानं
प्रकृतयाप्रसमीयन्यस्त आप्तिप्रतीत्यैव समीहितनिर्वाहेऽप्यस्मन्नराकांक्षायाऽइत्यादितिभावः एतेनान्वयव्यतिरेकोदाहरणकांक्षावदिनान्वयव्यतिरेकिहेतुलक्षणानन्तरमपरेन
लक्षणमभिधास्यते मणिकृतः प्रथमलक्षणानिर्भरबीजमाविःकृते अत एव हेत्वाभासप्रसंगस्य पृथगभिधानवस्तादिसाध्यकप्रतिज्ञायाः समव्याप्यायथा प्रवर्त्तितलक्षणमादिपति य
दिवेत्यादिना तत्र चासंभवासंभवमाविष्कर्तुं कतिपयप्रतिज्ञाजन्यबोधस्य यथायथं प्रदर्शितानुमित्यनतिरिक्तविषयकत्वमेव स्यापयति मेत्रइत्यादिना अयं गोविन्दत्रगोत्वस्य साध्यत्वपदे
साध्यतावच्छेदकगोत्वत्वविशिष्टप्रकारकत्वानजनकत्वासंभवात् आह नादात्म्येन गोरिति नत्रभवत्गोसाध्यकप्रतिज्ञातादृशीत्यापि यदि समवायेन गोत्वस्य साध्यत्वेऽपि तथा विषयप्र
तिज्ञासंप्रदायानुमतानन्तरानन्तसाध्यकत्वादृशप्रतिज्ञायादर्शितत्वोपजनकत्वासंभवान्नामानन्तत्वसत्या प्रकारप्रतिज्ञायास्तथात्वाभिधानमसंगतमित्यत आह कायानस्यागोत्वादिसा
ध्यकत्वेतिराकरोति गोत्वत्वाद्युपस्थित्येति तादृशप्रतिज्ञावाक्यादिः तत्रेति शेषः अत्रैवपपत्तेरिति प्रतिज्ञायाः साध्यतावच्छेदकोपस्थापकत्वानियमादन्यथा सन्दरवह्नित्वावच्छिन्नसा
ध्यकस्यलेपिवह्निमानित्याकारकप्रतिज्ञाप्रसंगादितिभावः यद्यपि समवायेन रक्तत्वविशिष्टदंडवान् चैत्रसाध्यकरक्तदंडिमानित्यादिप्रतिज्ञाया न विशिष्टसाध्यतावच्छेदकबोधक
तासंभवस्तथापि तत्र साध्यतावच्छेदकघटकसकलपदार्थानामेव विशकलितानां तादृशप्रतिज्ञावाक्यादुपस्थितिस्तदधीनसाध्यतावच्छेदकविशिष्टसाध्यविषयकमानसबोधेनापि
तत्रविशिष्टसाध्यस्यायप्रयोजनजिज्ञासाविषयत्वसिद्धिसंभवः प्रकृते तु विशकलितानामपि गोत्वत्वादिघटितपदार्थानामनोपस्थितिरिति विशेषः गोत्वादेः साध्यत्वे दोषान्तरमाह पदार्थे
ति पदार्थतावच्छेदकत्वपदार्थान्तराघटितत्वासंभवप्रयोजनकत्वेनाभिहितः इदमुपलक्षणं अन्वयितावच्छेदकरूपेणानुपस्थितत्वमपि तथा बोध्यं पर्वतो वह्निमानित्याकारकप्रतिज्ञानव
ह्निसाध्यकाऽपित्वभेदेन वह्निमत्साध्यकेव तथा च तत्रज्ञानबोधविषयतायामभेदसंबन्धेन वह्निमत्साध्यकानुमितिविषयतातो न वेलक्षणमतो न तत्राव्याप्त्यवकाश इत्यत आह नेयं वेति तादृशा
प्रतिज्ञाया वह्निसाध्यकत्वेनैवेत्यर्थः इत्युपनयसंगमादिमाकारकस्योपनयस्य तादृशप्रतिज्ञाघटितन्यायान्तर्गतत्वापपत्तेः वह्निमतः साध्यत्वे वह्निमद्व्याप्यवानित्याकारकस्यैवोपनयस्य संभ
वादितिभावः याहृत्ताने वह्निमानित्येतादृशप्रतिज्ञावाक्यजन्यज्ञानेऽभेद इतिभासत इत्यनेनान्वयः ननु वह्नेः संयोग इति शेषः नामार्थयोरभेदान्वयबोधस्याव्युत्पन्नत्वादिति हृदयम् तथा च तादृशा

गदा॰ धी
अवयव॰
२४

प्रतिज्ञाजन्यबोधे लिङ्गकत्वस्य विषयकत्वमनतिरिक्तविषयकत्वं च न संभवतीति भावः भेदे हेतुप्रतियोगिविशेषिते वा साध्ये इत्यादौ इत्यादिप्रतिज्ञायामादिपदादितरेभ्यो भिन्नमित्यादिपरिग्रहे वैलक्ष
ण्यं अनुमितिविलक्षणबोधजनकत्वं भेदसाध्यकानुमितौ भेदस्यानुयोगितायाः इत्यनुपस्वावच्छिन्नभेदसाध्यकानुमितावनुयोगितये नरविशेषितस्य तस्य विशेषणताविशेषेणाभिधानेऽतिप्रतिज्ञा
जन्ये च बोधे अप्रख्यातत्वोपस्थाप्यस्य भेदाश्रयत्वस्य नीतत्वे तरेभ्यो भिद्यत इत्यादिजन्ये च पञ्चम्यन्तार्थे तद्प्रतियोगिकत्वविशेषितभेदाश्रयत्वस्य तेन संबंधेनाभिन्नमित्यादिजन्ये परिनिष्ठातो भस्याप्यभेदा
श्रयत्वावच्छिन्नस्य तरेभ्यो भिन्नमित्यादिजन्ये च साप्रतियोगिकत्वविशेषितभेदाश्रयत्वावच्छिन्नस्य तरभिन्नमित्यादिजन्ये चाभेदेन तरप्रतियोगिकविशेषितभेदाश्रयतावच्छिन्नस्य तरेभ्योऽन्यदिसा
दिजन्ये चेतरप्रतियोगिकत्वविशेषितभेदावच्छिन्नस्येतरान्यदित्यादिजन्ये चाभेदेनेतरप्रतियोगिकविशेषितभेदावच्छिन्नस्याभेदेन पक्षांशे विशेषणत्वाद्धि सत्त्वमिते तत्ताहशबोधे वैलक्षण्यादि
तिभावः इदमुपलक्षणम् ईदृशादेशाप्रकृते विधेयांशे भानाद् इत्योदृश्यपावकेदकांशे भाने पि वैलक्षण्यमवसेयं गंधाद्यवच्छिन्नपक्षकानुमितौ गंधादेः साक्षाद्विधेयधर्मितावच्छेदकत्वात् गंधवती
तरेभ्यो भिद्यत इत्याकारकताहशप्रतिज्ञाजन्यबोधे च गंधादिसंबन्धस्येव तथात्वात् इत्युद्देश्यानुमितिपदस्य याहशविशिष्टार्थबोधः प्रतिज्ञाया जन्यते ताहशविशिष्टार्थबोधपरतेत्यभिप्रेत्य समाय
ने याहशेति याहशरूपावच्छिन्नपदकयाहशरूपावच्छिन्नसाध्यकसंमृदायप्रसिद्धप्रतिज्ञायाः याहशरूपावच्छिन्नपक्षे याहशरूपावच्छिन्नप्रकारकबोधजनिकास्ताहशरूपावच्छिन्नताह
शरूपावच्छिन्नप्रकारकबोधानिवर्त्यसंशयानिवर्तकताहशबोधान्यतमबोधजनकत्वे सति ताहशरूपावच्छिन्नपक्षकताहशरूपावच्छिन्नसाध्यकन्यायान्तर्गतत्वं प्रतिज्ञात्वमित्यर्थः अत्र च
जनकत्वं च बोधविशेषस्याप्रसिद्धायकमात्रेन न तन्न दर्शस्थलत्वलक्षणे निवेशः बोधाश्च विषयविशेषात् विशिष्यविशिष्टैवोपादेयाश्च तो नान्ताश्रयणीयाकावकाशः साध्यकनिखिलप्रतिज्ञासाधा
रणमपि प्रतिज्ञात्वे नैकसंभवतीति बोधानामन्यतमत्वेनानुगमः तेन रूपेण जनकताशावमन्दांशेपि बोधानामननुगमेपि ताहशताहशबोधनिरूपिताभावकूटघटितन्यस्याननुगतत्वान्ना
दृशाताहशाभेदकूटवच्छिन्नस्वरूपाद्यन्यतमवृत्तित्वनसामान्याभावस्थलेताहशताहशबोधनिवर्तिताभावकूटस्येवताघटकेन निवेशयितुमुचितत्वात् एवं च ताहशाभावकूटानिवेशास्तु चना
यैवान्यतमेनापीत्युक्तं पतेन सामान्याभावनिवेशस्तु चना यापि काइतिख्याख्यातमनादेयं विशेष्यदले न्यतमत्वानिवेशानमपि यत्प्रतिज्ञायां नानानां विधेयत्वं तत्रैव च पर्वतादिपक्षकवह्न्यादि
साध्यकस्थले पर्वतादौ वह्न्यादिमद्भेदरूपैकविधबोधस्येव प्रतिज्ञाया जननात् न तत्र तन्निवेशः पर्वतेन क्वन्यायान्तर्गतत्वस्यासंभवेपि न क्षतिः शाह्भेदस्याप्रयोजकत्वात् वह्निमत्वावच्छिन्न

प्रतिज्ञाया घटवद्भूतलादिवृत्तितधर्मावच्छिन्नविशेष्यकपर्वतत्वावच्छिन्नपदकप्रतिज्ञया च ताहशार्थमीवच्छिन्नप्रतिकारकोपि बोधो जन्यते तन्निवर्त्य भूतलं चत्वरं वेत्यादिसं
शयो पीति प्रतिज्ञायां प्रकृतपदतावच्छेदकावच्छिन्नपदकत्वस्य प्रकृतसाध्यतावच्छेदकावच्छिन्नसाध्यकत्वस्य वाऽनुपादानेनावद्बोधानिवर्त्यसंशयाप्रसिद्धिरतस्तदुपादाने यत्किंचि
द्रूपावच्छिन्नपक्षसाध्यककाप्रतिज्ञाप्रतिपाद्यविशिष्टार्थबोधजनकत्वस्य यत्किंचिद्रूपावच्छिन्नपक्षसाध्यकन्यायान्तर्गतत्वस्य निवेशनेऽतिप्रसंगः प्रागुपदर्शितएवेति यादृशरूपावच्छिन्न
पक्षसाध्यकप्रतिज्ञाप्रतिपाद्यविशिष्टार्थबोधानिवर्त्यसंशयानिवर्तकबोधजनकत्वं ताहशरूपावच्छिन्नपक्षसाध्यकन्यायान्तर्गतत्वं निवेशितं अपि च त्विन्यादिन्याये न साध्यांशे हेतुत्वा
नज्ञाप्यत्वमवगाहमानेपि निगमनादिजन्यबोधे प्रतिज्ञाप्रतिपाद्यविशिष्टार्थविषयकत्वस्यानन्तरयातिगमनाद्यतिव्याप्तिवारणाय तद्रूपावच्छिन्नविशेष्यकतद्रूपावच्छिन्नप्रकारकबो
धानिवर्त्यसंशयानिवर्तकत्वरूपताहशबोधानतिरिक्तविषयकत्वं बोधविशेषणमित्थं च प्रतिज्ञाजन्यबोधानिवर्त्यस्य वह्निर्धूमज्ञानज्ञाप्यो न वेत्याकारकसंशयस्य निवर्तकतया
ताहशबोधकारणं न च प्रतिज्ञाजन्यबोधस्य पर्वतत्वावच्छिन्नविशेष्यकवह्निमत्त्वाद्यवच्छिन्नप्रकारकबोधत्वेनैवोपादेयतया निगमनादिजन्यबोधस्यापि न व्याप्त्या तन्निवर्त्यत्वमुक्तसं
शयस्यादतमेवेति वाच्यं अप्रामाण्यज्ञानानास्कंदितताहशविशिष्टार्थविषयकनिश्चयत्वावच्छिन्ननिवर्त्यत्वस्यैव विशेषणीयत्वादुक्तसंशयस्य च धूमज्ञानज्ञाप्यत्वाविषयकवह्निम
त्पर्वतनिश्चयानिवर्त्यत्वेन तथाविधनिश्चयत्वावच्छिन्नानिवर्त्यत्वादेतेन सर्वेषामेव संशयानां यावद्वह्निमत्पर्वतादिविषयकसमूहालंबनात्मकस्वविरोधिनिश्चयनिवर्तनीय
तया ताहशबोधानिवर्त्यसंशयाप्रसिद्धिरित्यपि निरस्तं ताहशनिश्चयत्वनिष्ठनिवर्तकतावच्छेदकत्वं च तत्स्वरूपसंबन्धविशेषः किंत्वनतिरिक्तवृत्तित्वं तेन संबन्धेन वह्निमान्नवेत्याद्या
कारैकदेशसंशयप्रतिवह्निसंबन्धभिन्नपर्वतादिनिश्चयत्वेनाप्रतिबंधकत्वेपि ताहशसंशयनिवर्तकप्रतिज्ञाजन्यबोधस्यासंग्रहः अतएव यस्मादालोकवान्पर्वतो वह्निमान्धू
मादित्यादौ हेतुजन्यबोधनिवर्त्यहेतुत्वसमोयं न वेति संशयप्रतिप्रतिज्ञाप्रतिपाद्यविशिष्टाविशेषविषयकनिश्चयत्वेनाप्रतिबन्धकत्वेपि न विशेष्यदलं वैयर्थ्यं वह्निमत्त्वाद्यवच्छि
न्नप्रकारकनिश्चयत्वावच्छिन्ननिवर्त्यपर्वतत्वाद्यवच्छिन्नविशेष्यकनिश्चयत्वावच्छिन्ननिवर्त्यस्य चाप्रसिद्धिरतो विशिष्यप्रकार विशेष्यप्रकारोभयनिवेशने यद्यपि प्रतिज्ञाप्रतिपा
द्यस्य विधेयविशिष्टस्य धर्मिण एव याहशविशिष्टार्थ्यनुपादानसंभवस्तथापि याहशविशिष्टार्थबोधकेऽपेक्षितविषयप्रकारयोः स्वेच्छयोपादानसूचनाय पदद्वयं ताहशविशिष्टार्थवत्त्व

बोधिकाश्रयाभिधानमनुचितं तथापि धूमादालोकवान्पर्वतो वह्निमान्धूमादित्यादौ प्रतिज्ञार्थहेत्वर्थविषयकसमूहालंबनबोधजनके जनके हेतुत्वे हेतौ वाक्यायावयवत्वापत्तिरजन्यत्वापा
तर्गतत्वनिवेशापत्तेः प्रतिज्ञाजन्यबोधनिष्ठैकदेशविषयकत्वघटितत्वावच्छिन्नजन्यतानिरूपितजनकतामादाय केदेशे चातिप्रसंगवारणाय विशिष्टार्थविषयबोधत्वावच्छिन्नजन्यताप्रतियोगि
कजनकत्वनिवेशे पर्वतो वह्निमानित्यादिप्रतिज्ञायाश्च संग्रहः वक्ष्यादिमान्पर्वतादौ वह्नित्वाद्यवगाहिभ्रमात्मकधूमादिबोधसाधारण्यानुरोधेन तत्तत्पदार्थानां परस्परोपश्लेषावगाहित्व
वत्तादृशप्रतिज्ञाजन्यतावच्छेदकबोधपर्यमानन्तर्भाविशिष्टार्थविषयत्वस्यातथात्वादिति अन्यतिरिक्तविषयकबोधनिष्ठतादृशपरस्परोपश्लेषावगाहित्वाद्यवच्छिन्नजन्यताप्रतियोगिकजनक
तायां निवेशसूचनाय तथाभिधानं तादृशपरस्परोपश्लेषावगाहित्वाद्यवच्छिन्नजन्यताप्रतियोगिकजनकतायां निवेशसूचनाय तथाभिधानं तादृशपरस्परोपश्लेषावगाहिशाब्दत्वे जन्य
तावच्छेदकतापर्याप्त्यनिवेशात् न्यूनातिरिक्तविषयकत्वदलवैयर्थ्यमिममवधेयं भेदादिसाध्यकस्थले पृथिवी इतरेभ्यो भिद्यत इत्यादिप्रतिपाद्यभेदाश्रयत्वादिरूपपर्याप्तिविदेकार्थनिश्चया
प्रतिबध्यभेदादिकोटिकसंशयं प्रति पृथिवी नेतराद्भिद्यत इत्यादिप्रतिज्ञाजन्यभेदादिप्रकारकनिश्चयस्य प्रतिबंधकतायां न कस्याश्चिदपि प्रतिज्ञाया स्तादृशसंशयानिवर्तकबोधजनकत्व
मतस्तत्ताहिशिष्टार्थविषयकनिश्चयनिवर्त्यत्वाभावकूटनिवेशनप्रतिज्ञाजन्यबोधस्य स्वसमानाकारानुमितौ सिद्धिविधया प्रतिबंधकत्वात्तादृशानुमितेः सिसाधयिषाकालीनता
दृशबोधानिवर्त्यत्वायास्तादृशप्रामाण्यज्ञानानास्कन्दितप्रतिज्ञाप्रतिपाद्यविशिष्टार्थनिश्चयत्वावच्छिन्नप्रतिबन्धकताकान्यत्वादसम्भवः इत्यतो ज्ञानसामान्यमुपेक्ष्य सिसाधयिष
यैतानुधावनं न चानुमितेस्तादृशानिश्चयत्वावच्छिन्नप्रतिबन्धकान्यत्वेऽपि तत्प्रतिबन्धकसिसाधयिषाकालीनबोधजनकत्वमादाय प्रतिज्ञायां लक्षणसमन्वयः सम्भवतीति
सम्प्रायपदमनर्थकं स्वरूपयोग्यतारूपजनकतायाएव निवेशनीयतया ऽव्यासेरप्यनवकाशादिति वाच्यं अनिवर्तकत्वेऽहि प्रतिबंधकतावच्छेदकीभूतविषयितानुरूप्यत्वेन तत्प्रति
वन्धकत्वाभावः तथा सम्प्रामाण्यज्ञानास्कन्दिततादृशार्थबोधमादाय निगमनातिव्याप्तेरावश्यकत्वात् तथा च सिसाधयिषाकालीनसिद्धेः प्रतिवन्धकत्वेऽपि प्रतिवन्ध
कतावच्छेदकीभूतविषयितामात्रेणैवानुमित्यनिवर्तकत्वासंभवात् न च सिद्धेः पूर्वपरतोवा सिसाधयिषायाऽस्त्वादस्य तेहि द्वितीयक्षणे प्रथमक्षणे वा सिसाधयिषाविरहाद्वि
शिष्टत्वमक्षतमेवेति सिसाधयिषाविशिष्टायाश्चापि सिद्धेरनुमितिप्रतिवन्धकत्वमक्षतमेवेति तथा सत्यप्रामाण्यज्ञानानास्कन्दिततादृशविशिष्टार्थनिश्चयत्वावच्छिन्नप्रति

वन्धकताक्रान्तत्वमिति वाच्यं यादृशासिद्धेः पर्वतः सिसाधयिषोत्पादः तादृशासिद्धेरेवाप्रतिवंधकत्वात् प्रसक्तनिश्चये विशेषदर्शनकालीनविपरीतनिश्चयस्याप्रतिवंधकताम
तेनसापि प्रतिज्ञानार्थे निश्चयत्वावच्छिन्नाप्रतिबंधकताउक्तदिशासंभवइति प्रसक्तस्तामान्यमुपेक्ष्य संशयपर्यंतानुधावनं अत्र च नहि शिष्टार्थविषयकनिश्चयत्वानवच्छिन्नसंशयप्रति
वन्धकतास्त्वस्याज्ञाने विशेषणतोपगमेनैवातिरिक्तविषयकसत्वेन तादृशागजवायस्मतथाविधप्रमत्ताननाम्नत्वादिसंशयप्रतिवंधकताश्रयस्यवारणसंभवात्तादृशप्रतिवन्ध
कतात्वेनैवतथाविधनिश्चयत्वावच्छिन्नप्रतिवन्धकताक्रान्तसंशयप्रतिवन्धकतानिवेशः नेनुतथाविधनिश्चयत्वावच्छिन्नप्रतिवंधकताक्रान्तसंशयप्रतिवन्धकतात्वेनैगवादि
स्वव्यवधानेनोक्तहेतुवारणाय तादृशबोधान्यतमेति प्रकृतप्रतिज्ञाजन्यतावच्छेदकीभूतयादृशयादृशबुद्धित्वतादृशतादृशबुद्धित्वावच्छिन्नान्यतमजन्यतानिरूपितजनकतापर्याप्त्यस्य
विवक्षणीयतया नोक्तसमूहालंबनबोधमादाय तत्रातिप्रसंगः स्मृतमाये गवाभेदस्येत्यादिसकलपक्षेनैः समं बोधाविवक्षणीयतायां नोक्तसमूहालंबनबोधमादाय तत्रातिप्रसंगः
स्मृतविषयकबोधजनकत्वप्रतिज्ञायाः संभवतीप्रागभिहितं तावतैवगवाभेदः प्रतिज्ञाप्रतिपाद्य इत्यस्यालाभात् तत्र तादृशबोधमादाय लक्षणं कर्तव्यमिति स्फुटमेव तथापि तत्तादृश
पक्षबोधे लक्षणघटको तत्वस्यविषयइति स्फुटीकर्तुं तदुपादानं तादात्म्येनवह्नेः साध्यत्वे पर्वतो वह्निरित्येव प्रतिज्ञाजायते तत्र च वह्निमदभेदबोधोनलक्षणघटकइत्यतः संयोगेन समवाये
न वेति तादात्म्यातिरिक्तसंबंधेनेत्यर्थः वह्न्यादित्यादिसमस्यतत्र यत्साध्यइति प्राक्तनेनान्वितं वह्निमद्भेदस्येति अत्राप्येतादृशबोधस्य प्रतिज्ञाजन्यतायाः प्राग्दर्शितत्वेऽप्यन्यविधबोधा
सम्भवमाविष्कर्तुमेतदुपादानं नपाककृतिमत्वस्येति पाककृतिसमुदायस्येत्यर्थः पचतीति प्रतिज्ञातस्तद्बोधादिति भावः पाककर्तृभेदस्येति पाककृत्त्वावच्छिन्नाभेदस्य पाककृति
मत्वावच्छिन्नाभेदस्य चेत्यर्थः पक्तापाककृतिमानित्यादिप्रतिज्ञातस्तद्बोधादिति भावः इतरभेदवत्त्वस्येति इतरभेदाश्रयतासंबंधस्येत्यर्थः इतरेभ्यो भिद्यतइत्यादितस्तादृशबोधादिति
भावः इतराभेदस्येति इतरभेदावच्छिन्नाभेदस्येत्यर्थः इतरान्नेति प्रतिज्ञातस्तद्बोधादितिभावः इतरभेदवत्वस्येति इतरभेदस्संसर्गस्येत्यर्थः नेतराणीमनस्तद्बोधादितिभावः इतरभिन्नाभे
दस्येति इतरभेदाश्रयत्वावच्छिन्नाभेदस्येत्यर्थः इतरभिन्नेति प्रतिज्ञातस्तद्बोधादितिभावः अतिरिक्तविषयकत्वार्थः एवंचैवं अन्यूनविषयकत्वं तावद्बोधनिष्ठस्य यावत्संशयनिवर्तक
त्वं दर्शितहेतुजन्यबोधस्य ज्ञानत्वाप्रमत्वयोग्यत्वेत्यादिसंशयप्रतिज्ञाजन्यबोधनिवर्तनीयप्रतिबन्धकत्वपितादृशयावत्संशयान्तर्गतपर्वतो वह्निमान्नवेत्यादिसंशयानिवर्तकत्वेनवा

रणसंभवादिति वदतो मतमाह तावदिति तत्तद्विशिष्टार्थविषयककोटीत्यर्थः तावद्बोधनिवर्त्त्यायावत्संशयेति तत्तद्विशिष्टार्थबोधानन्तरमप्यकिंचिद्बोधनिवर्त्त्यप्रावल्यसंशये त्यर्थः तेन मेयादिसाध्य
कस्थले भेदतद्व्याप्यत्वादिकोटिकनानाविधसंशयानामेव प्रकृतसाध्यप्रतिज्ञार्थबोधानिवर्त्त्यायावत्संशयान्तर्गततया यावत्संशयनिवर्त्तकतायाः पृथ्वीवीनेतराणि पृथिवीतरेभ्यो भिद्यत इ
त्यादिप्रत्येकप्रतिज्ञाजन्यबोधेऽसत्त्वेपि तादृशसकलवाक्यजन्यसमूहालम्बनबोधस्य तावत्संशयनिवर्त्तकत्वान्न च निरुक्तानतिरिक्तानतिरिक्तविषयकत्वस्यापि सत्त्वान्नूतनकत्वमापाद्यैव प्र
त्येकप्रतिज्ञासकलतरणसमन्वयो बोध्यः अत्र च स्वमतापेक्षया गौरवमेवास्वरसबीजं बोध्यं न च विप्रयितादिसंबन्धेन पाकाद्यवच्छिन्नकृत्यादिर्यत्र साध्यता तत्र कीदृशउपनयः न तावत्पाककृति
व्याप्यवानित्याद्याकारकः तत्कृतेर्घटकपाकादिपदस्य पाकविषयकादिलाक्षणिकतायाः पाकविषयककृतित्वाद्यवच्छिन्ननिरूपितव्याप्तेरेव लाभात्प्रकृतसाध्यतावच्छेदकावच्छिन्नानि
रूपिताया व्याप्तेरलाभेनार्थान्तरप्रसंगादित्यत आह चैत्र इति साध्ये विशिष्टरूपसंभवादिति भावः निपातार्थेन नामार्थस्य भेदान्वयविधिव्युत्पत्तिविरुद्धतया नेतराणि सोदोप्रथमायात्रतृतीयो
गितार्थकत्वमसिद्धमिति हृदयं यथोपदर्शितेति प्रतिज्ञोपस्थापितेत्यर्थः उपनेयत्वात् उपनयेन बोध्यतीयत्वात् तादृशव्याप्तेरेवाकांक्षितत्वेन नयः पाककृतिसामग्रीमान्पचतीत्युदाहरणे तत्प्र
तिपादृशव्याप्तिविशिष्टस्य पक्षधर्मताकांक्षयैवोपप्रयोगादिति भावः स्तु वच पवेति तथा च हेतुना तादृशव्याप्तिविशिष्टहेतुमत्त्वस्यैवोपस्थापनादिति भावः तत्तु मणिकृता यालस्यपार्थवितर्कयन्तस्मात्त
थेति लिंगमनत्रसंनिराकरणीयत्वात् तथापदवाटिमउपनयेपि तद्दोषग्रासइत्यस्यानुमतेस्तादृशोपनयस्तत्र तानल्लनमतुस्तत्साह तव्यानामिति तत्पदेनुपयोपदर्शितसाध्यस्यैव तादृशसाध्यव्याप्ति
विशिष्टहेतोरपि परामर्शसंभवइति व्याप्त्यादिपदप्रयोगवैयर्थ्यमित्याशयेनाह तच्चानेवेति नत्रपक्षादेरपि पराक्रान्तत्वात्तस्यैव कथंतोपनयस्य तत्त्वकृत्वेन परामर्शेत्यत आह योग्यतेति तात्पर्यव
शादित्यर्थः व्याप्तिविशिष्टहेतुमत्वस्यैवाकांक्षितत्वेन तत्परतया पुनरुक्त्यादिति भावः तद्दानत्वकृत्वेन साध्यस्येति प्रथमके ल्यंतद्व्याप्यस्येति द्वितीयपदमभिप्रेत्य पर्वतो वह्निमानित्यादेर्न्याय
स वह्निसाध्यकत्वनिराकृतस्य वह्निव्याप्यसमवायायामित्याकारकोपनयनिराकृत्वं तामतमाह केचिदिति विप्रतिपत्तौ कोटितज्जन्यस्मृतिविषयत्वं नतज्जन्यप्रत्येकशाब्दबोधप्रकारत्वं वा न तु त
दधीनसंशयप्रकारत्वमतो न संशये चेत्यस्य वैयर्थ्यं तत्पदर्शनं च संशयकोटितानिर्वाहकत्वेन नमस्ततो जिज्ञासायामतत्रत्वादित्यवधेयम् यद्यपि वह्निमत उपस्थितेर्दशायां वह्नेरप्युपस्थि
तेतया तादृशविप्रतिपत्तिवाक्याद्वह्निकोटिकोपि संशयो भवितुमर्हति तथापि स्वातंत्र्येण कोट्युपस्थितिः संशयप्रयोजिकेत्यभिप्रायेणेदमित्यवधेयम् अथवा विप्रतिपत्तिवाक्या ।

च्छाहृपवसंशायइतिमतानुसारेणेदं वस्तुतोवह्न्यभाववत्कोटितायामेववह्निकोटिकस्यसंशयस्योपपाद्यते ननुवह्निमद्भेदस्यस्वस्वाभाववत्प्रकारकज्ञानस्यैवसंशय
त्वात् प्रकृतेचवह्न्यभावोनोपस्थितोऽपितुनहेद्भेदएवेतिवह्न्यभाववत्कोटित्वासंभवाद्वह्निसंशयोनसंशयोनसंभवतीत्यभिप्रायः एतत्सूचनार्थेवचवह्निमद्भेदस्यकोटित्व
मभिहितं तद्भिन्नयानस्यप्रयोजनंतात्तदभावात् यद्वायद्धर्मिणितत्प्रकारकबोधौपयिकाकांक्षावत्पदजन्यतदुपस्थितिरेवयद्धर्मिणितत्कोटिकसंशयजनकपर्वतोवह्न्यभाववा
इतिवाक्याद्वह्न्याद्युपस्थितौपर्वतादौवह्न्यादिसंशयानुदयात् तथाचपर्वतोवह्निमानितिवाक्यस्यवह्न्यादिपदमपिनपर्वतादौवह्न्यादिभेदान्वयौपयिकाकांक्षावदितिता
दृशविशिष्टोपस्थितिवाक्याद्वह्न्यादिकोटिकसंशयइतितुपरमार्थः नचैवमनन्वयस्यापत्तेः वह्निमद्व्याप्यमिति प्राकृतिस्तत्रयाहेतुस्तस्याभावः सूचितः फलोपधायकताव्द
पजनकतानिवेशशंकयाप्रसक्तातादृशशाब्दबोधानुपधायकप्रतिज्ञायामव्याप्तिर्योग्यताविवक्षयानिराकरोति यद्वेति अतएवेति हेत्वर्थादिविषयकशाब्दबोधसामग्र
उत्तरमित्यर्थः एतेनफलोपधानविवक्षणेत्ववान्तरार्थविषयकशाब्दमात्रोपधायकप्रतिज्ञायामव्याप्तिः प्रसज्यते अनतिरिक्तविषयकशाब्दबोधानुपधायकत्वादि
तिसूचितं तादृशेति तादृशशाब्दबोधजनकज्ञानविषयेत्यर्थः आकांक्षानिवेशस्यपर्वतोवह्निः संबन्धीत्यादिनिराकांक्षवाक्यव्युदासः नचपर्वतोवह्निमानित्यादिशा
ब्दप्रतिनिराकांक्षतादृशवाक्यविषयकज्ञानत्वेनाजनकत्वात्तादृशशाब्दबोधजनकतावच्छेदकविषयिताकत्वानिवेशेनैवोपपत्तेराकांक्षानिवेशनमफलमितिवाच्य
पर्वतोवह्निमानित्यादिवाक्यानुपूर्वीप्रकारकभ्रमात्मकतादृशनिराकांक्षविषयकज्ञानस्यापितथाविधशाब्दधीजनकतयातदीयविषयितायाअपितज्जनकतावच्छेदक
त्वेनतज्जनकतावच्छेदकप्रकारताश्रयानुपूर्वीरूपाकांक्षाघटितत्वनिवेशस्यावश्यकतयातदीयविषयत्वात् नचाघटितत्वंचतदघटकवर्णसमुदायत्वंतज्जनकतावच्छेद
कीभूततभ्रमात्मयत्किंचिज्ज्ञानवृत्तिविषयितानिरूपकवर्णसमुदायत्वमितितत्पर्यवसितोऽर्थः ह्रदोवह्निमानित्यादिभ्रमानुमितिसमानविषयकतादृशवाक्यस्यवारणाय।

योग्यतानिवेशानं योग्यत्वं चाबाधितार्थकत्वं प्रकृतसाध्यविशिष्टप्रकृतपदबोधकत्वमिति यावत् वैशिष्ट्यं च वास्तवं नतु वैज्ञानिकं यद्यपि स्यात् तंत्रेण योग्यतानिवेशोऽनि
रर्थकः अस्तु न विषयत्वावच्छिन्नजन्यताप्रतियोगिकजनकताया अवश्यं विवक्षणीयतया चास्तवैशिष्ट्याघटितसाध्यविशिष्टपदविषयकत्वस्तु न विषयकत्वनिवे।
शासंभवेऽप्ययोग्यवाक्यप्रतिपाद्यविधिस्थार्थीप्रसिद्ध्यासंप्रदायसिद्धप्रतिज्ञाप्रतिपाद्यविधिस्थार्थबोधानिवर्त्यसंशयानिवर्तकत्वरूपानतिरिक्तविषयकत्वघटितलद
णस्य तज्ज्ञानित्वास्यप्रसक्तेः तथापि वास्तववैशिष्ट्यघटितानतिरिक्तविषयकत्वनिवेशसूचनाय योग्यतोपादानं आदिपदतात्पर्यविशेषपरिग्रहः तेन निराकांक्ष
काद्याकांक्षितप्रतिज्ञासमानाकारवाक्यार्थस्यार्थीतरपरतादृशवाक्यस्य च व्युदासः नन्वाकांक्षादिनिवेशे शाब्दवाक्यपदयोर्वैयर्थ्यं आकांक्षादेर्ज्ञानान्तरौपयिकत्वविर
हाद्वाक्यातिरिक्तेऽसत्वाच्चानुमितिजनकपरामर्शादौ शाब्दधीजनकयोग्यताज्ञानादौ चातिप्रसंगानवकाशादित्यत आकांक्षादिमत्वलाभार्थकतायोस्तादृशपदोपादानसा
र्थक्यमिति तल्लाभश्चेति तल्लाभः शाब्दबोधं प्रतिआकांक्षादिमत्पदवाक्यस्य जनकतयाकांक्षादिमत्वलाभः तादृशपदद्वयोपादानादिस्यर्थः शाब्दपदस्य योगेन शाब्दज।
न्यार्थकत्वेन तल्लाभः आकांक्षादिविरहितस्यापि शाब्दस्य शाब्दजन्यस्मृतिहेतुत्वात् स्मृतौ जातिविशेषो मम स्यापकेति रूप्यान्वनुभवनिष्ठशाब्दत्वजात्युपस्थापकार्थकशाब्द
बोधं प्रत्याकांक्षादिरहितस्यापि ज्ञानादेर्हेतुतया वाक्यपदोपादाने केवलशाब्दपदात्तल्लाभ इति वाक्यपदोपादानोपदेति भावः यत्तु तल्लाभश्चेति अस्मन्न विषयक
शाब्दत्वावच्छिन्नोपयिकाकांक्षादिमत्वलाभश्चेत्यर्थः शाब्दपदस्यावयवशक्त्या शाब्दजन्यज्ञानत्वावच्छिन्नार्थकत्वे शाब्दजन्यतावच्छेदकजातिविशेषानुपस्थितस्यात्
दवच्छिन्नजन्यताप्रतियोगिकजनकतालाभो न भवतीत्यतउक्तंजातिविशेषो मम स्यापस्थापकोति तथा च कार्यदिशि शाब्दत्वजातेः कारणदिशि च वाक्यपदेनाकांक्षा
दिमत्वस्य लाभान्ना तादृशशाब्दत्वावच्छिन्नोपयिकाकांक्षादिमत्वलाभ इति भाव इति व्याख्यातं तत् अवच्छेदकतापर्याप्तिनिवेशानिरुक्तत्वेन तद्विषयकावच्छिन्नजन्यता

निवेशाभावे ऽस्योपपन्नत्वात् साध्यवत्त्वनिवेशप्रयोजनाभावश्चोपस्थितेरप्रयोजकत्वात् न च तदर्थविषयकत्वस्य साध्यवत्त्वजन्यतावच्छेदकत्वात् तदवच्छिन्नत्वविरहात् अप्रसिद्धेन वि
षयकसाध्यत्वावच्छिन्नत्वैनेवेजमतान्निवेशनीयेति वाच्यं विनिगमनाविरहेण साध्यत्वविशिष्टतत्तदर्थविषयकत्वस्यापि जन्यतावच्छेदकत्वात् न च स्मारकाविकपदपरित्यागे ऽनु
मितिविषयकसाध्यधीजनकमित्यवशिष्यते तथा च पर्वतो वह्निमानित्यादिप्रतिज्ञावाक्यस्यानुमित्सबोधकतया व्याप्तिविशिष्टपक्षधर्मताकोपरिशिष्टैरन्तमितिविप्रयोविषयोपस्थिति
मध्यमपदलोपिसमासाभिप्रायेण सम्पादितलक्षणपर्यवसितार्थमाचष्टे तथा चेति हेत्वन्तवृत्तिप्रथमेणोदाहरणस्येत्यादिना तथा अनुपसंहारणस्य लिङ्गबोधकत्वा
द्यतिरेकिपर्यन्तानुधावनं यो यो धूमवान् स स वह्निमानित्याद्युदाहरणस्य वह्न्यभावादिरूपलिङ्गबोधकत्वात् तद्विषयकत्वमात्रनिवेशे नैवताहृशोदाहरणवारणसंभ
वेन पदमुख्यविशेष्यकत्वपर्यन्तस्य विवक्षणीयस्यात्रावृत्तिद्वारा यथा यत्र दभिन्नमित्यादि हेत्वन्तवृत्तितदनुसरणे हेत्वन्तावृत्तिते पुदाहरणे ऽव्याप्तिमाह क्रमादाहनीति उप
नयवारणायेति पदत्तावच्छेदकावच्छिन्नपदविशेष्यकत्वनिवेशस्य प्रयोजनं तद्विरहे ष्येतदर्थमेवतन्निवेशेनानुषंगपदे निगमनातिव्याप्तिर्न संभवतीत्यभिप्रायेण निगम
नोपेक्षा तन्नतदंश्यो ऽभिधीयते इत्यादिनिगमनस्य पदविशेष्यकत्वाभावान्निगमनसामान्येनातिव्याप्तिसंभवस्त्वभिप्रायेण वा पदत्वमुख्यविशेष्यकत्वनिवेशे ऽपि गोत्वसास्नाभा
ववद्गोत्वाभावादि यत्र यत्र सास्ना तत्र गोत्वमित्युदाहरणे पदमुख्यविशेष्यकबोधजनके ऽतिव्याप्तिर्दुर्वारैव पदमात्रमुख्यविशेष्यकत्वनिवेशाच्चाविसम्प्रसक्तस्थले मात्राद्याप्र
सिद्ध्या व्याप्तिरिति पदत्तावच्छेदकानवच्छिन्नपदमुख्यविशेष्यत्वानिरूपकत्वमवविवक्षणीयं तथा च निगमनेनानुषंगपदे ऽतिव्याप्तिर्न संभवत्येवेति ध्येयम् लिङ्गत्वस्यैकेव
लान्वयितया सामान्यतो लिङ्गादिविषयकत्वज्ञानेनमास्तिद्धमिति प्रकृतलिङ्गविषयकत्वविवक्षणीयं तथापि नतिस्मारकस्य यथाप्येनाह यद्यपि प्रकृतेति प्रकृतलिङ्गतावच्छेदका
वच्छिन्नविषयकत्वविवक्षणे पृथिवीतरेभ्यो भिद्यते इत्यादिप्रतिज्ञायानां संग्रहः तज्जन्यबोधे स्वरूपत एव पृथिवीत्वादिरूपलिङ्गभानादित्याशयेन स्यानां तरे दोषानाह गन्ध
वतीति तथेतरेभ्यो भिद्यते उपनयासंभवश्चेति तथा च तादृशप्रतिज्ञादिहेतितन्यायप्रवेशनसम्भवनीतिका व्याप्तिरिति भावः इदमापूर्वमोहेनगन्धवत्त्वेनेति उपनयस्ये दृशाहस्य

गा॰टी॰
अ॰ प॰
१८

प्रतिज्ञोपदर्शितपदतावच्छेदकावच्छिन्नपरत्वादिति भावः । गंधवत्त्वान्वयेति गंधवद्भेदस्य साध्यस्येत्यर्थः । अप्रयोगादिति उद्देश्यतावच्छेदकविधेयतावच्छेदकयोरैक्येऽभेदान्वयबोधस्याव्युत्पन्नत्वा
त् अन्यथा वेदो वेद इत्यादावप्यन्वयप्रसंगादिति भावः । साध्याभावेति साध्याभावव्यापकीभूतो योऽभावस्तदभावत्वेनेत्यर्थः । तथा चाभिन्नरूपेण गंधादेरुद्देश्यविधेयतावच्छेदक
गर्भेऽन्तर्भावान्नान्वयबोधानुपपत्तिरिति भावः । ननु हेत्वभावाभावत्वेन हेतूपस्थापकपदाभावात्कथमुपनयवाक्यात्तेन रूपेण पक्षे हेतुभानमित्यत आह अतएवेति साध्याभावव्या
पकतावच्छेदकहेत्वभावत्वाद्यवच्छिन्नाभावत्वेन हेत्वन्वयानुरोधादेवेत्यर्थः । न चैवं पृथिवीति नञ्द्वयेनाभावाभावत्वेन हेतुबोधनादिति भावः । यद्यपि पृथिवीत्वे हेतुकस्थले ता
दृशोपनयप्रयोगो न युज्यते पृथिवीपदात्स्वरूपत एवोपस्थितस्य पृथिवीत्वरूपपदार्थतावच्छेदकस्य नञ्द्वयीभावेऽन्वयासम्भवेन हेत्वभावाभावत्वेन हेतुलाभात् न च हेतुमद्भेदा
भावोऽपि हेतुरेवोपि हेतोरेवान्योन्याभावाभावस्य प्रतियोगितावच्छेदकरूपत्वात् एवं हेतुमद्भेद एव व्यापकतायत्र नेतरभेदस्तत्र पृथिवीत्वस्य वोदाहरणे न बोध्यते इति पृथिवीभेदा
भावत्वेन पृथिवीत्वबोधकस्तादृशोपनयो युज्यते इति वाच्यम् एवमपि पृथिवीत्वादिति हेतुवाक्योपस्थितपृथिवीत्वत्वविशिष्टहेतुकानुमित्यौपयिकतद्रूपविशिष्टवद्भेदत्वा
वच्छिन्नसाध्याभावव्यापकताया एवाकांक्षिततया यत्र नेतरभेदस्तत्र पृथिवीत्ववदितरोदाहरणेनोपदर्शनीयतया तथा तद्रूपविशिष्टवद्भेदत्वावच्छिन्नाभावत्वेन हेतुमत्ताया उ
पनेयत्वात्तादृशोपनया संगतेः अन्यथा पृथिवीतरेभ्यो भिद्यते गन्धसमवायिकारणतावच्छेदकरूपवत्त्वादित्यादावपि तथोपनयप्रयोगापत्तेरिति तथापि तादात्म्येन पृथि
वीहेतुकस्थलाभिप्रायकमिदं आदिपदात्तु च नैयायिकगंधवतीत्याद्याकारस्य न च नात्र गंधस्य इत्थमाद्याकारस्य वाऽपनयस्य परिग्रहः । अत्र हेत्वभावाद्यादौ साध्याभावव्यापकत्वाभावे
पि न क्षतिः प्राचीनमते उदाहरणे देवव्याप्तिलाभेन पक्षधर्मतामात्रस्योपनेयत्वात् तत एव प्राचामित्युक्तं साध्याभावव्यापके सा दोषे च व्यापकतानुपलक्षणार्थकं ननु चैवं
पृथिवीत्वादिकप्राचीनानुमतोपनयोऽसंगतः नञर्थाभावस्य प्रतियोग्यनुयोगिभ्युपरागेणैव भानाद्वाऽनुभवेनादन्योन्याभावबोधे समानविभक्तिकप्रतियोग्यनुयोगिवा
चकपदसमभिव्याहारस्य तंत्रत्वाद्भावबोधे तत्संबंधतानुयोगिवाचकपदसमभिव्याहारस्यापेक्षितत्वात् प्रकृते चानुयोगिवाचकपदाभावेन पृथिवीभेदान्योन्याभावाभा

वादिबोधासंभवादितिनवीनानुमतस्तत्रव्यापकीभूताभावप्रतियोगितांशवतीचेयमित्याद्याकारकोपनयप्रवादरणीयः नचचहेतुमत्तावच्छेदकनेदर्शितमुत्पत्तिविरोधो
दुष्परिहरप्रवेश्यात्तोच नव्यमतेसमाधानमाह यद्वेत्यादि चेतनत्वग्निमेणान्वयः तद्विशिष्टइति तद्धर्मधर्मितावच्छेदकीकृत्य इतराविशेषितत्तद्धर्मावच्छिन्नाभेदान्वयबोधस्यैव
मुनतिविरुद्धत्वादित्यर्थः नानुपपत्तीति महत्तैतदुद्देश्यतावच्छेदकघटकत्वमात्रविधेयतावच्छेदकघटकतायाभानादितिभावः तथाच गंधवतीतरेभ्योभिद्यते गंधादित्यादिन्या
यस्यापिनिष्प्रत्यूहत्वं तथा लिंगविषयकतानुशास्त्रांतर्गतप्रतिज्ञायामप्यासिद्धेर्वीरैवेतिभावः नत्रपदार्थविशेषणतायाणपि लिंगविषयत्वतच्छून्यत्वंविवक्षणीयमतोनोक्ताव्या
प्तिः उक्तस्थलेपदार्थविशेषणतयैवलिंगविषयतासत्वेनविशिष्टाभावसत्वादित्यत आह पदार्थविशेषणत्वेति प्रपंचद्वितीयमश्रीमात्रवच्छेदिस्यादाविति अव्यापकामित्यग्निमेणान्व
यः प्रथमपदार्थविशेषणत्वपदार्थनिरूपितविशेषणतात्मकलिंगविषयतायाः परंपरयापदार्थनिरूपितत्वाक्रान्तवतीनतरेभ्योभिद्यते इत्यादावपिमनत्वर्थस्तवत्यामेविशेषणीभू
तगन्धविषयतायागन्धसमानकालीनरूपवती पृथिवीतरेभ्योभिद्यतइत्यादौ नद्विषयतायाश्च सात्वासत्तानिरूपितविशेषणतानात्मकत्वेन साक्षात्परासाध्याशेननिरूपितत्व
स्यैवनिवेशनीयत्वादितिचेन्न पदार्थविशेषणत्वपदस्यक्तार्थकत्वतदानिगमनातिव्याप्तेः नचानिगमनेऽप्युपपदानुपपत्तेरुक्तप्रयुक्तापदतावच्छेदकानवच्छिन्नमुख्यविशेष्यकान्यत्व
स्यैवतत्तुरीयार्थत्वेनैववापदतावच्छेदकावच्छिन्नमुख्यविशेष्यकत्वस्य विषयप्रकारतार्थत्वविवक्षणीयत्वात्तथानातिव्याप्तिरितिवाच्यं एवमप्यनुपगपदेतत्त्रातिव्याप्तेर्दुर्वारत्वात् अतः
पदतावच्छेदकप्रकारतानिरूपकविशेष्यतानिरूपितप्रकारतात्वमेवतदर्थोवाच्यः पदतावच्छेदकप्रकारतातः प्रातिनो सर्वेषुप्रकारतानां हेत्वादिविशेष्यत्वनिरूपिताश्चया
त्वविशेषः कासिन्नादात्म्याचित्समवयानेत्यर्थेतिविधेयकोटिप्रविष्टपदार्थप्रकारताचतद्धर्मितावच्छेदकप्रकारतानिरूपकविशेष्यतानिरूपिताविधेयानिरूपितविशेष्य
तायाधर्मितावच्छेदकावच्छिन्नतयाधर्मितावच्छेदकप्रकारतानिरूपितविशेष्यतायाश्च स्वस्वधर्मितानवच्छेदकत्वेनतदनवच्छिन्नतयाविधेयधर्मितावच्छेदकप्रकारता।
निरूपकविशेष्यतयाभेदादितिनिगमनादिजन्यबोधीयविधेयकोटिप्रविष्टलिंगविषयतानपदतावच्छेदकप्रकारतानिरूपकविशेष्यतानिरूपितविशेषणतात्मिकेति

न निगमनाद्युक्तिव्याप्तिः एवं च वह्निसामग्रीमात्वकेऽरित्सादावव्याप्तिः प्रसज्यत एवेति एतेन पर्वतो वह्निमान्धूमादित्यादिप्रसिद्धस्थले तर्गतोपनयेति व्याप्तिप्रसंजकत्वेन नैतद्विवक्षणं
यो कापष्यमारोहति न चायं दोषो ति व्यापकं चोपनयस्य त्वन्नेन स्वयमेव वक्ष्यत इति नानुपपत्तिरिति वाच्यं उपनयप्रकारणार्थकताघेव लिंगविषयकत्वविशेषणस्य स्वयं प्राग्व्याख्यात
तायाउपनयमात्र एव याहृशाविवक्षा याभिति व्याप्तिस्तदाशांकायां संदर्भविरोधस्य जागरूकत्वादिस्यपि स्मादिति न चैवमपि व्यापकं चोपनयस्येति ग्रंथासंगतिः तत्र हि प्राचीनग्रंथस्य स्व
मवान्वह्निमान्धूमादित्यादित्यायां तर्गतोपनयविशेषपरत्वात् तत्र हेतोरेव पक्षतावच्छेदकनया पक्षतावच्छेदकावच्छिन्नो यद्विशेषणत्वं तस्यापि मतताऽवच्छेदकप्रकारता
निरूपकविशेष्यतानिरूपितप्रकारताभिन्नत्वे सति साध्यतावच्छेदकप्रकारतानिरूपकविशेष्यतानिरूपितप्रकारताभिन्नयल्लिंगविषयत्वेन उक्तत्वमित्यर्थः साध्यविशेषण
तयेत्यस्य पद्यार्थकतार्थकत्वे निगमने परंपरया साध्यविशेषणतयैव लिंगभानादिति व्याप्त्यापत्तेः न चैवमपि ज्ञानविषयत्वात् धूमादित्यादिन्यायांतर्गतनिगमनेऽतिव्याप्तिः तादृवस्य
मेव ज्ञानविषयत्वरूपसाध्यतावच्छेदकप्रकारतानिरूपकविशेष्यतानिरूपितत्वस्य हेतप्रकारतायां सत्त्वादिति वाच्यं शुद्धसाध्यतावच्छेदकप्रकारतानिरूपकविशेष्यता
यापवविषयत्वरणीयत्वात् न तु पक्षधर्मे लिंगाविषयत्वकत्वविवक्षणेऽपि द्रव्यमित्यादौ न्यायव्याप्त्यवकाशः द्रव्यं द्रव्यमिति बोधस्य तद्रव्यएकविषयस्य तद्रव्यसमवेतद्रव्यविषय
कत्वसंभवादतः स्यान्नान्तरमाह प्रमेयत्वमिति न तु प्रमेयत्वं प्रमाविषयत्वं तच्च विषयभेदादिभिन्नं एवं च घटनिष्ठप्रमेयत्वविषयकस्य प्रमेयत्वमभिधेयत्वमिति बोधस्य प्रमेयत्व
रूपपक्षनिष्ठप्रमेयत्वादिविषयकस्य संभवान्नाव्याप्तिरतः स्थलान्तरमनुसरति गोत्वमाश्रयति न तु पक्षतावच्छेदकविशिष्टपक्षविषयतानतः पाति लिंगविषयतास्वत्वनिवे
शो नोपदर्शितहेतुपक्षकप्रतिज्ञायामसंग्रहः तदंतः पातित्वे च पक्षतावच्छेदकविशिष्टेति पक्षतावच्छेदकावच्छिन्नपक्षविशेष्यतानिरूपितायां साध्यतावच्छेदकावच्छिन्नसाध्य
प्रकारतानिरूपितवैशिष्ट्यविषयतान्तर्हद्भिन्नत्वलिंगविषयतास्वरूपत्वमित्यर्थः अथ नहि तत्त्वं न साक्षात्परंपरासाधारणं यन्निरूपकत्वं तदभावः पक्षतावच्छेदकप्रकारता
याउक्तयुक्त्या तदनिरूपकत्वात् कथं चिन्निरूपकत्वोपपादनेऽपि परंपरासंयोगेन वह्नेः साध्यतावह्निसंयोगत्वेन हेतुत्वान्न तत्र प्रतिज्ञायामव्याप्तिः हेतुभूतवैशिष्ट्यविषयतायाः स्व

निरूपकत्वविरहात् एवं सति तादात्म्यं परंपरासाधारणानुगतनिरूप्यनिरूपकभावो विदुर्वचः परंपरानिरूपितत्वस्य मत्त्रिरूपितनिरूपितत्वाद्यासकत्वात् एतेन तादृशावच्छिन्नस्वविष
यतायास्तु बहिर्भूतत्वोपपत्तिरित्यत्रापगमपदेऽपि च निगमनातिव्याप्तिः तादृशानिरूपयत्वव्यापकत्वमात्रस्य प्रतिबन्धकताविशेषणत्वे धूमादालोकवान्पर्वतो वह्निमान्स्मादित्यत्र
हेतुत्ववध्येः तिव्याप्तिः तादृशहेतुतिघाणहेतुत्वे धूमीयत्वेनेति संयोगप्रतिबन्धकतावच्छेदकतादृशबोधविषयतायातिरिक्तविषयताबहिर्भूतत्वात् पक्षपतेरतस्तादृशानिरूपय
त्वव्याप्यत्वमपि प्रतिबन्धकताविशेषणं न च पद्धतावच्छेदकावच्छिन्नमुख्यविशेष्यताकत्वनिवेशस्यावश्यकतया नैतादृशातिव्याप्तिसम्भावनेति अर्थव्याप्यत्वनिवेशानां
मितिवाच्यं तथ्यानुमेयपदेऽधूमादवह्निमतः सधर्मीपर्वतो वह्निमान्स्मादित्यादिस्थलीयनिगमनेतत्प्रमेयाद्यत्वव्यत्रमेयादित्यादिस्थलीयतत्वतयवेदवातिव्याप्तेर्दु
र्वारत्वात्तन्निवेशस्यावश्यकत्वादिति न च तद्धर्मितावच्छेदकनिविष्टप्रकारत्वेन प्रतिबन्धकतावच्छेदकमपि तत्तन्निष्ठविशेष्यतावच्छेदकत्वमेव तथा च गन्धवतीतरेभ्यो भिद्यते
इत्यादिप्रतिज्ञाजन्यबोधीयफेतुप्रकारतायास्तु बहिर्भूतत्वादव्याप्तिरिति वाच्यं विशेष्यतावच्छेदकतायाः एवं प्रकारतात्वोपगमेन तादृशबोधे तदन्यप्रकारतानभ्युपगमात् ए
वं सति प्रसक्तस्य भूतलघटवदित्यादिज्ञानस्य भूतलत्वांशे तद्धर्मितावच्छेदकत्वस्य प्रकारान्तरेणावारणसम्भवात् स्तु वा विशेष्यतावच्छेदकताव्यविषयताप्रकारतातो
ऽप्येव तथापि न क्षतिः तादृशाविषयताबहिर्भूतविषयतामन्यत्वज्ञानविशेषणमुपेक्ष्य तादृशाबहिर्भूतविषयतान्यवच्छिन्नजन्यतानिरूपितजनकतायावाच्यविशेषणत्वोप
गमेन विशेष्यतावच्छेदकताभिन्नगन्धादिविषयतायाः प्रतिज्ञाजन्यबोधीये स्वेऽपितस्याः प्रतिज्ञाजन्यतावच्छेदककोटिनिवेशप्रयोजनाभावेनानुमितित्समानविषयकत्वाभिवेश
तस्सम्भलोकस्य वैयर्थ्यप्रसंग इति तादृशालिंगविषयतान्यत्वनिवेशानर्थक्यं अभावस्य घटकतया तल्लिंगांशेऽवेयर्थ्यं उक्तरीत्या बहिर्भूतत्वनिर्वचनतायासविहेयात्कल्पान्तर
मात्र्रयते वस्तुतात्विति लिंगत्वमिति व्याप्तिरित्यर्थः ननु व्याप्त्यनुगततयोर्न्वयव्यतिरेकव्याप्त्योः स्तु घटकव्यापकत्वयोर्वोधकतरमात्रस्य विषयाउपादानेऽनवबोधकोपन्नपादा
वति व्याप्तिरित्यांशेऽकथ्याता तादृशाव्याप्तिघटकव्यापकताद्वयविषयत्वयोरनुगतरूपेणाभावनिवेशाधिति तथा चेति प्रकृतहेतुतावच्छेदकावच्छिन्नस्येति ममकत्वान्वितव्या

मिविषयकत्वमित्यत्र व्याप्तिपदव्यापकत्वविषयतानिरूपितसाध्यतावच्छेदकादिविषयतावच्छेदकावच्छिन्नसाध्यतानुमितित्वावच्छिन्नजनकतावच्छेदकत्वपर्यन्तधर्मताविषयकोदाहरणज
न्यबोधीयव्यापकतादिविषयताया अनुमितिजनकतावच्छेदककोटिप्रविष्टतया नत्वतिव्याप्तेः न च हेतुव्यापकत्वादिविषयतात्वेनैव तद्विषयतानां जनकतावच्छेदकतावच्छेदक
कोटौ निवेशादनुमितिजनकस्यापि तादृशज्ञानस्य विषयतानां तादृशरूपाक्रान्तानां नयात्वमनन्तमेवेतिवाच्यं तादृशविषयतात्वेन पक्षविशेषणतापन्नहेतुविशेषणतायत्रत
त्रसामानाधिकरण्यविशेषणतापन्नसाध्यादिविषयतानिरूपितव्यापकत्वविषयताघटितप्रकारणतावच्छेदकत्वस्य कत्वाज्ज्ञानहृत्पारतन्त्र्यावच्छेदकत्वाभावात् यद्रूपावच्छिन्नविषयताज
नकतावच्छेदिकानद्रूपावच्छिन्नविषयतात्वस्य तत्र निवेशे च साध्यतावच्छेदकावच्छिन्नविषयताया अप्यनुमितिजनकतावच्छेदककोटिप्रविष्टतया तादृशासम्भवस्य तत्समप्रतिज्ञावच्छि
न्नव्यापकत्वं साध्यस्य पक्षस्य चावृत्तकं यत्र तत्स्य लीयप्रतितताया असंग्रहः यत्र तत्र तु निवेशादननुगमानवकाश इति चेन्न पक्षतावच्छेदकावच्छिन्नमुख्यविशेष्यतानिरूपितवि
षयतानिरूपितका विषयतानन्निरूपितविषयतानिरूपितविषयतायां विशेषणविधया हेतुतानुमितिजनकतावच्छेदकतायाः पर्याप्त्यधिकरणधर्मत्वेन हेतुव्यापकताविशि
ष्टसाध्यविषयत्वसाध्याभावव्यापकत्वविशिष्टहेत्वभावविषयत्वान्यतरस्य तदभावस्य निवेशेनानुपपत्त्यभावात् हेतावनुमितिजनकतावच्छेदिकाया अन्वयपरामर्शीयहेतुव्यापक
तावच्छिन्नसाध्यविषयतायाः पक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितहेतुविषयतानिरूपिताधेयत्वविषयतानिरूपिताधिकरणविषयतानिरूपितत्वव्यतिरेकिपरामर्शीयसा
ध्याभावस्य व्यापकतावच्छिन्नहेत्वभावविषयताया अपि तादृशविशेष्यतानिरूपितसंसर्गीयविषयतानिरूपितहेतुविषयतानिरूपितप्रतियोगितात्वविषयतानिरूपितत्वेन सा
ध्याभावव्यापकताविशिष्टहेत्वभावविषयतात्वस्यापि हेतुव्यापकताविशिष्टसाध्यविषयतात्वव्यतिरिक्तविषयत्वविशेषणविधयाऽनुमितिजनकतावच्छेदकतावच्छेदकताप
र्याप्त्यधिकरणत्वात् यद्यपि परंपरयापक्षविशेष्यताया अनिरूपिता उदाहरणजन्यबोधीयहेतुव्यापकताविशिष्टसाध्यादिविषयतानामनुमितिजनकतावच्छेदिकत्वया तनि
रूपितव्यापकत्वादिविषयतापि न तथेति तदीयसाध्यादिविषयताविशेषणतायां व्यापकत्वविषयतानिरूपितत्वस्यानुमितिजनकतावच्छेदकप्रवेशेन सम्भवात् जनकताव
च्छेदकविषयताहेतेरेव यत्समस्यतादृशविषयताविशेषणतया जनकतावच्छेदकतावच्छेदकत्वसम्भवादिति निरुक्तपक्षविषयताप्रचमविषयतादिविशेषणतायामव।

च्छेदकतापर्याप्त्यधिकरणं यत्साध्यतादिव्यापकत्वविषयतानिरूपितत्वसहितसाध्यादिविषयतात्वं तत्रोदाहरणजन्यबोधीयसाध्यादिविषयतासाधारणं न यथा चोदाहरणेऽतिव्या
प्तिर्दुर्वारैव तथापि निरुक्तजनकतावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नविषयतावच्छिन्नाया अप्रतिबन्धकतातद्वच्छेदकविषयतात्वेनोदाहरणजन्यबोधीयहे-
तुव्यापकसाध्यादिविषयताया: संग्रहो बोध्य: अनुमितिजनकतावच्छेदकपरामर्शीयसाध्यादिविषयताया हेतुव्यापकतादिविषयतानिरूपितसाध्यादिविषयतात्वेन साध्यं
गज्ञाप्यत्वेतिनातिप्रसङ्गः वह्न्यादिमतः पर्वतादेर्द्रव्यत्वादिरूपसाध्यविशिष्टस्य पृथिवीत्वादिज्ञाप्यत्वेपि वह्न्यादिविशिष्टस्य न तथात्वमिति विशेषणावक्तिरूपवपचस्याज्ञा
प्यत्वबोधकत्वात् पर्वतो वह्निमान् पृथिवीत्वादित्यादिप्रयोगः विषयतायाः पर्याप्तिसंबंधेन विशिष्टेऽन्वयोपगमात् द्रव्यत्वादिरूपसाध्यत्वेन वह्न्यादिरूपेपन्नतावच्छेदकविशि
ष्टपर्वतादौ पृथिवीत्वादिज्ञाप्यत्वेपि न क्षतिरिति वाच्यं एवमपि द्रव्यत्ववान् पर्वतो वह्निमान् धूमात् न पृथिवीत्वादित्यादौ नञर्थान्वयानुपपत्तेर्दुर्वारत्वात् पृथिवीत्वज्ञाप्यतापर्या
प्त्यधिकरणद्रव्यत्वविशिष्टपर्वतादौ वह्न्यादिरूपविशेषणांतरावच्छिन्नेपि तज्ज्ञाप्यताविरहासंभवात् अस्मन्मते च तत्र पर्वताद्यन्वयिनि वह्न्यादिप्रकारकज्ञानविषयत्वे पृथिवी
त्वादिरूपलिंगज्ञानप्रयोज्यत्वस्य पंचम्यर्थस्याभावान्वयान्नदबाधस्य तत्राबाधेनानुपपत्तिविरहात् एवं साध्यज्ञाप्यत्वान्वयपक्षेपि उक्तप्रयोगानुपपत्तिर्दुष्पत्या वह्न्यादेरपि

मेयत्वादिना पृथिवीत्वादिज्ञापकत्वात् यदि च प्रयोजकत्वं समभिव्याहृतपदार्थविशेष्यतानिरूपितसाध्यतावच्छेदकावच्छिन्नविधेयताचं खण्डशो लक्षणया पंचम्यर्थान्वयवता स्वाश्रये
पदार्थेन ह्रदेण हेतुज्ञाप्यतालाभः तज्ज्ञाससमभिव्याहारस्थले च लिंगज्ञानान्वितप्रयोज्यत्वरूपैकार्थस्य निरूढविधेयतारूपापरपंचम्यर्थस्य भावेन ज्ञाप्रत्याय्यत इत्युच्यते
तदा साध्यतावच्छेदकावच्छिन्नद्विधाभानादौ खण्डशः ख्यातत्वयिनी पदार्थविशेष्यतानिरूपितविधेयतापदार्थान्वयिनी साध्यविधेयतानिरूपितविशेष्यता वा पंचम्यर्थ इति
विनिगमनाविरहः एकपदस्यार्थद्वये खण्डशो पदद्वयस्यैव वा प्रत्येकमर्थद्वये लक्षणे सम्प्रत्ययकोऽपि विशेष इति प्रसंगात् ऽन्यं च प्राजनकत्वज्ञापकत्वार्थकत्वनम्रर्थान्वयस्थले
नुपपत्तिदर्शनेन निराकर्तव्या जनकत्वज्ञाप्यत्वार्थकत्वमवस्यापद्यते धूमाद्दहनादित्यादिना ग्रन्थसाज्ञापकत्वं पदद्वयमतावच्छेदकविरहेणग्रहस्यातथात्वव्याप्तेरपि विरहेणेति शब्दशोना
र्थानुभवोपपादनेन तज्जन्यताज्ञानयास्तादात्म्यादिति जनकत्वज्ञापकत्वयोः पंचम्यर्थत्वे निरूपकतासंबंधावच्छिन्नाभावाप्रसिद्ध्याऽप्रयत्नात् संबंधावच्छिन्नाभावप्रत्ययप्रवादहस्य प्राहुः कौका
र्यः तथा च तत्र जन्यत्वं यानि ज्ञजनकत्वज्ञापकत्वयोरिव दहनधूमादिति प्रयोगमितिगौरवाभावस्तेन दाहोऽनुदहनाजुत्वस्यशौचत्तरूपादित्यपि स्यादिति भावः न च दाहादिविशेषवि
तजनकत्वादेरेवामावृत्तत्वदाहरूपप्रकारनिष्ठप्रतीयतइति वाच्यम् प्रयमानार्थस्य पंचम्यर्थविशेष्यतयैव प्रादातामति ते दाहादिविशेषितजनकत्वादिरूपप्रतियोगिनः प्राहा तु
प्रसिद्धस्य नञः भावबोधनासंभवात् पंचम्यर्थस्य प्रकारस्य मम पदार्थविशेषितस्यापि नञ्समभिव्याहारस्थले भानोपगमे च्युत्पत्तिभेदापत्तेः सर्वत्रैव प्रकृत्यर्थविमत्यर्थविशेष
णं तत्रनिरूपकतासमभिव्याहृतपदार्थान्तरमिति चानुभवसिद्धप्रथमान्तपदार्थविशेष्यताभंगेन असंभवत्कालिकइत्यनस्य दाहादहनादित्यादौ वहन्याद्युत्पादहनादे दाहजनक
त्वादिविशेषत्ववदित्यन्वादेरपि दाहसंबंधादिविशेष्यतये त्यनेदाहसंबंधपि नदाहस्याविदहनो दाहजनकत्वादिसम्भूत्यलेवनबोधस्य स्वीकारेण वा कथंचेदाप्रसंगात् यत्रान्यस्य
दाहो दहनात्त्वमदित्यनस्मात्तत्रैतदित्यनस्य दाहोन दहनादितिप्रयोगानुपपत्तिश्चेति प्रवदन्ति जन्मतायाः पंचम्यर्थत्वेपि हृदोनपरमाणुपरिमाणादित्यादिप्रयोगानुपपत्तिः पा
रिमाण्डल्यस्यकार्यसामान्यजनकतया परमाणुपरिमाणादिजन्यत्वाप्रसिद्धेर्नेत्रार्थप्रतियोगितयान्वयासंभवात् दाहाद्यन्वयिनि जन्यत्वे प्रकृत्यर्थस्य निरूपितत्वसंबंधेनाभावबोधो

प्रागभावेनियामकत्वंतत्त्वावच्छिन्नाभावाप्रत्युपगमः लक्षणयाप्रकृत्यर्थनिरूपितत्वस्याभावान्वयोपगमेपिगगनत्वेनपरमाणुपरमाणुपरिमाणादित्यादौगगनादौजन्यत्वान्वयायोगपत्त्या
देतुपपत्तिः पारिमाण्डल्यनिरूपितत्वाभाववज्जन्यत्वाभाववद्गगनमित्याकारकयाह्वियानन्वयावगाहित्याः प्रतीतेरुपगमेचघटोनघटजनकादित्यपिस्यात् घटजनकाद्यनिरू
पितजन्यत्वाभावस्यघटादावबाधात् दण्डाद्यनिरूपितजन्यत्वाभावस्यपटादौबाधेनपटोनदण्डादित्यादावप्युपपत्तेश्च गगनादौजन्यत्वभ्रमदशायांगगनंपारिमाण्डल्यादित्यादि
त्यादिवाक्यस्यावबोधकतापत्तेः पञ्चम्यर्थजन्यतासामान्येलक्षणयाप्रकृत्युपस्थाप्यपारिमाण्डल्यनिरूपितत्वगगनवृत्तित्वोभयत्वावच्छिन्नाभावस्यबोधोपगमेचजनकतायाः।
पञ्चम्यर्थत्वेपिसामान्येलक्षणयाप्रकृत्युपस्थाप्यपारिमाण्डल्यावृत्तित्वगगननिरूपितत्वोभयत्वावच्छिन्नस्याभाववोधोपगमेनसामञ्जस्य नचनत्रलक्षणयाभावप्रकत्वेपिदा
हेनजलादित्यादौलक्षणंविनैवोपपत्तौजन्यत्वस्यपञ्चम्यर्थत्वमुचितमितिवाच्यं जलादेरपिकार्यजनकत्वभ्रमदशायांदाहोनपारिमाण्डल्यादित्यादाविवान्वयबोधयोग्यत्वानु
भविकतयातद्दर्शयेनतत्रापिजन्यतायाजलादिनिरूपितत्वाभाववोधस्यावश्यकत्वात् अत्रेदंतत्त्वं प्रामाविशाणमाह्नीतिवाक्यवद्दाहोनपारिमाण्डल्यादित्यादिवाक्यमप्रमाण
मेवतद्वाक्यस्यप्रामाण्यानुरोधेनलक्षणयापारिमाण्डल्यादिनिरूपितत्वाभाववोधस्यक्वचिदप्युपगमेपिदाहोनजलादित्यादिवाक्येलक्षणाज्ञानस्यकालेन्वयवोधस्या
नुभविकतयाजन्यत्वाभाववोधकतापिताहृशवाक्यस्योपगन्तव्येतिजन्यत्वंपञ्चम्यर्थइतिजन्यज्ञानविषयत्वमितिजन्यज्ञानान्वयिप्रकृत्यर्थज्ञानभ्रमभिन्नग्राह्य अत्राव्याप्तिपक्षय
मेत्त्वावगाहिभ्रमरूपप्रहदत्वादिज्ञानस्यपर्वतादौवह्न्यादयुमापकत्वेपिपर्वतोवह्निमान्हृदत्वादित्यादिप्रयोगस्यनापत्तिर्नवापर्वतोवह्निमान्समात्रहृदत्वादित्यादिप्रयोगानुप
पत्तिः यद्यपियत्किंचिद्विषयभ्रमान्यत्वंभ्रमसाधारणंभ्रमसामान्यभिन्नत्वंचतदभाववतितत्प्रकारकत्वरूपभ्रमत्वस्यतत्प्रकारकसंबंधविशेषघटितत्वेनाननुगततयाजगतीग
तयावच्छत्तुभ्रमाणांगतत्वस्तुभ्रमत्वावच्छिन्नभेदकूटत्वरूपमपिदुर्ज्ञेयं तथापिप्रकृतसाध्यहेतुपक्षकपरामर्शप्रकारीभूतायेयेतत्तत्प्रकारकभ्रमभिन्नत्वमेवविशेषणंदेयं यद्यपिधू
मादिमत्यपिपर्वतादौसमवायादिसंबंधावच्छिन्नधूमाद्यभावसत्त्वात् पर्वतादौधूमादिप्रमायाः संग्रहाययत्संबंधेनहेतुप्रकारकज्ञानंयत्रहेतुवाचकपदेनविवक्षितंतत्रतत्संबंधाव

गादि तत्प्रकारकभ्रमात्मकं तत्प्रतीयतइत्यस्यार्थः तत्र तथाच स्वरूपादिसंबंधेनप्रमेयत्वादेर्यत्रहेतुत्वं तत्र तत्संबन्धेन तत्तत्प्रमाप्रसिद्ध्या तदन्यत्वं इत्यर्थः तथापि तत्र तादृशभ्रमान्यत्वाप्र
तीतिर्वेवनस्तोक्रियेतेऽतोनदोषः वस्तुतस्तु स्वानुयोगितिसुविषयोग्यतानिरूपितत्वस्यप्रतियोगितिसुत्वस्यावच्छिन्नत्वे तन्निरूपितसंबंधेन संबन्धविशिष्टान्यप्रकारताशालित्वमेवानुगत
भ्रमत्वं स्वस्वचमत्तोभ्रमविषयतयैवप्रमेयत्ववाच्यत्वादिज्ञापकमितिभ्रमदशायां वाच्यप्रमेयत्वादिज्ञानादिप्रयोगस्तत्राहत्याप्रयोगाधीनबोधस्यपंचम्यालादनत्याकत्वमप्रसहर
ति पर्वतेचेति एवं च पंचमीजन्यज्ञानप्रभावार्थकस्थितौ च हेतुमत्त्वजन्यत्वेज्ञाप्यत्वेलक्षणे वेतिजन्यत्वापेक्षया तस्यमाशीरगौरवादितिभावः नचेति धूमादालोकवान्पर्वतोव
ह्निमान्नितिप्रतिज्ञाघटितन्यायप्रयोगालोकादौ नत्वेवं प्रकृतहेतुत्वघटितस्वार्थबोधकपंचमीनिवेशेनापि वारणसम्भवाद्धूमादिति हेतुत्वप्रतिपादनं अत्र पंचम्याः प्रकृतसाध्यान्वितस्वा
र्थबोधकत्वविशेषणमात्रेणातिव्याप्तिवारणसम्भवात्तादृशसाध्ये विवक्षणीयोपस्थापितत्वविशेषणमाहतत्येस्यलाभेनेऽतिव्याप्तिंदर्शयति धूमाद्वह्निमदिति अत्र वह्निमत्वे
नपक्षस्योपस्थानात् विवक्षणीयविशेषणे पक्षतावच्छेदकपर्यन्तनिवेशस्याप्यवश्यकत्वमाह तिः साध्यतावच्छेदकावच्छिन्नत्वांशनिवेशनाय स्यलान्तरेऽतिव्याप्तिंदर्शयति पर्वतोधू
माद्वह्निमानिति तत्र हि निगमने तस्माद्धूमाद्वह्निमानित्याकारकेऽत्र पंचम्यर्थविशिष्टवह्नित्वमेव साध्यतावच्छेदकमिति तदवच्छिन्ने साध्ये पंचम्यर्थान्वयात्साध्यतावच्छेदक
विशिष्टान्वितस्वार्थबोधकत्वनिवेशेनातिव्याप्तिः धूमाद्वह्निमत्त्वमित्यादौ प्रकृतपक्षतावच्छेदकावच्छिन्नयस्य साध्यस्य द्वितीयवह्निपदजन्योपस्थितिविषयान्वयः प्रथम
वह्निपदोपस्थापितेतत्रैव प्रतिज्ञाघटकपंचम्यर्थस्यान्वयात्प्रकृतसाध्यान्वितस्वार्थबोधकत्वविशेषणेन वारणासंभवात्साध्ये प्रकृतपक्षान्वितत्वं विहाय प्रकृतपक्षान्वि
तस्वार्थबोधकपदोपस्थापितत्वनिवेशितं यद्युभयवह्निपदेन कमपि साध्यमुपस्थाप्यतेऽतो नेतावताप्युक्तातिव्याप्तिवारणसम्भवः तथापि प्रकृतपक्षतावच्छेदकावच्छिन्नावि
शेष्यतानिरूपितायाविशेषणतातदवच्छिन्नसाध्यतावच्छेदकविशिष्टसाध्यीयविशेष्यतानिरूपितस्वार्थविषयताप्रयोजकबोधकत्वात्पर्थः पंचमीतत्समानविषयप्रयोजनाभा
वाऽउपनयोपस्थापितपक्षविशेषतामन्नेसाध्यान्वितार्थकपंचम्यन्तनन्यदमादायानतुबगपदोपिनिगमनेऽतिव्याप्तेर्वारणलाभाय पक्षपदप्रयोगेनायनामा— ज्ञानादि

गा॰ टी॰
अ॰ वं॰
३२

स्यादौ ज्ञानपदमुख्यार्थपरमेव पंचम्यर्थान्वयस्य न चैवं संभवेन लक्षणा बीजभूतान्वयानुपपत्तिविरहादित्यभिमानिना उक्तलक्षणाव्याप्तिमाशंक्य उद्धृतमुपन्यस्यति यत्विति स्फु
टज्ञानत्वावच्छिन्नेन समं पंचम्यर्थान्वयसंभवेप्यनुमितिजनकज्ञानविषयतया ज्ञानोपस्थिता चेद् ज्ञानरूपहेतोस्तद्विषयतानिरूपकत्वस्याकांक्षायां योज्ञानवान्सइत्याले
त्युदाहरणादिप्रयोगसंभवः इति ज्ञानविषयकज्ञानत्वावच्छिन्नेनान्वयानुपपत्त्या लक्षणाया आवश्यकत्वमिति समाधत्ते तन्नेत्यादिना यद्विषयकज्ञानस्य यद्विषयकज्ञानत्वाव
च्छिन्नस्य रूढत्वमनुमितिजनकत्वं तस्य व्याप्त्यादिजिज्ञासायां तत्स्वरूपे वैयर्थ्यतया पर्यनोवाच्यत्वप्रतीता उमापकज्ञानविषयतायानिरूपकाकांक्षायामित्यर्थः उदाहरणादि
प्रयोगः उदाहरणोपनयाभ्यां तन्निरूपणीयपक्षधर्मतासंप्रदर्शनं यद्यपि ज्ञानविषयकज्ञानत्वावच्छिन्ने ज्ञानपदस्य तात्पर्येपि मुख्यार्थज्ञानत्वावच्छिन्नपरत्वमन्ततएवेति स्फु
टोपदर्शितमुख्यार्थतात्पर्यग्राहित्वरूपलाक्षणिकत्वं नोपपद्यते तथापि प्रकारतावच्छेदकविलक्षणरूपावच्छिन्नपरत्वमेव लाक्षणिकत्वमतो न दोषः ननु स्फुटज्ञानत्वा
वच्छिन्नेनानुमापकत्वबोधेपि तत्र तन्निर्वाहकव्याप्त्यादिमद्विषयकत्वलाभाय वस्तुगत्या ताहशज्ञानविषयीभूतज्ञानव्याप्त्यादिप्रदर्शनसंगतिरिति तत्राह अन्यथेति जनक
ज्ञानविषयताप्रतीते ज्ञानेवाक्तवताहशविषयताऽवरुद्धाप्यव्याप्त्युपदर्शनेस्य वैवादेरप्यानन्त्यात् अनुमापकज्ञानविषयतायाः यत्नात्माज्ञानादिस्त्रयः स्वीकृत्वात्मेमुदाह
रणादिप्रयोगप्रसंगादित्यर्थः तथा च स्वरूपवादी व्याप्त्यादिप्रदर्शनेपि तन्निर्वाहकव्याप्त्यादिमद्विषयकत्वपर्यन्तलाभाकांक्षाया अनुसरणात् यथा स्वरूपवादोन तत्प्रदर्शि
नेतद्धेतत्प्रतीते ज्ञानेपि तत्प्रदर्शनं नोपपद्यते इति भावः उक्तप्रतिज्ञाद्यवतिव्याप्तिवारणाय प्रकारान्तरेण लक्षणं परिष्कुर्वतां मतमाह केचित्त्विति पंचम्यन्तेति कस्याश्चित् प्रतिज्ञा
याः पंचम्यन्तलाक्षणिकपदवत्त्वेपि स्फुटज्ञानज्ञाप्यालौकिकवान्सर्वतो वह्निमान् इत्यादिप्रतिज्ञायां व्यभिचारेणावयवतावच्छेदकहेतुत्वरूपं च स्वचनं देवलक्षणमित्यत्र यथाप
रिष्कृतेन ताहशेति ताहशपदं पंचम्यन्तलाक्षणिकपदप्रतिज्ञात्वादिकं च ताहशपदाघटितस्यापि प्रतिज्ञादेः सत्त्वेन ताहशपदवत्त्वव्यभिचारीति तच्छून्यत्वाभावान्न प्रतिज्ञा
दावतिव्याप्तिः ताहशपदवत्त्वव्यभिचारिमेयत्वादिमन्यत्वाप्रसिद्ध्या अवयवतावच्छेदकतेति अत्र प्रतिज्ञात्वहेतुत्वादिसाधारणस्यावयवतावच्छेदकत्वे स्पकस्याभावान्न प्रतिज्ञाता

दिकं विशिष्योपादाय तत्कृमंतनिवेशं च तथाच हेतुत्वाश्चवनताघोपातं तन्ताहृशपदवृत्तत्वव्यभिचारितविशेषणमनर्थकं यदि च प्रतिज्ञात्वहेतुत्वादिसाधारणं प्रतिज्ञात्वादिपंचान्यत
मत्वमवयवतावच्छेदकं तत्वं तदा तच्चेतत्तत्वप्रवेशो तस्याम्ना हशस्पदुर्वैचत्वात् तक्वचैतत्तदेवास्तु लक्षणं मृमतममध्ये हेतुत्वमंतर्भाव्यतद्या हतैयविशेषणं तवदातेच प्रक्षालना
यीति न्यायेनाग्रुक्तमिव्यवस्यतः पंचम्यंतेति लक्षणकर्तृरनुमते धूमादिन्यादिवाक्यस्य धूमादिपदस्य ज्ञानलक्षणत्वात् अण्हृष्यति न चास्त्विति ज्ञानज्ञाप्यत्वलक्षणयेति ज्ञा
प्यत्वलक्षणाया अवयवकतानां चैवज्ञानां घास्याप्याधिकस्य प्रवेशो नैव धूमादि समस्मुच्यार्थपरत्वेपि धूमादिज्ञानज्ञाप्यत्वलाभसंभवइत्यर्थः न च प्रातिपदिके न पंचमी प्रकृतिधू
मादिपदे तन्वेवज्ञानस्य पंचम्यर्थैकदेशतया तत्र धूमादिपदार्थस्यान्वयायोगात् धूमादिज्ञानलाभः न च ज्ञाप्यत्वस्य पंचम्यर्थत्वेपि ज्ञानत्वत्वरूपतदेकदेशे कथं धूमादिपदार्थतज्ज्ञा
नान्वयइति वाच्यं चैत्रस्य पुत्रः इत्यादौ ससंबंधिकपदार्थैकदेशजन्यत्वादौ पदार्थान्तरस्यान्वयदर्शनात्रिः प्रतियोगिकपदपदार्थैकदेश इत्यान्वयस्याभ्युपगमात् न च
त्वतेनोपस्थितेरुतरान्वयो विज्ञायते नत्वितरविशेषणतयोपस्थिते अत एव गोनिमस्मो दोषत्वनङ्गो त्वाद्युपस्थितये लक्षणइत्यतश्राकांक्षाविरहएव पदार्थान्तरस्य पदार्थैकदे
शेनान्वयेबीजं स च सप्रतियोगिकनिष्प्रतियोगिकैकदेशसाधारणइति वाच्यं यत्वानुरोधे न सप्रतियोगिकपदार्थे विशेषणतयोपस्थितेपि प्रतियोगिजिज्ञासाजायतइति क
ल्पनात् न च ज्ञानादिसविषयकपदार्थेपि तथोपस्थिते विषयजिज्ञासाजायतइतिपुम्नेतकल्पकाभावादिस्याशंक्य सविषयकोहीति हृष्यातेन पदार्थैकदेशे ज्ञानेपि विषयो का
कांक्षावस्यापयति श्राकांक्षावैचित्र्याच्चेति उच्चरितं तच्चोपस्थितपवेतराकांक्षाकचिद्विशेषणतयाप्युपस्थिते कस्यचिदाकांक्षेति विषयत्वभावाधीनतयाकांक्षावैचित्र्यादित्यर्थः
कर्तृत्वतीवेति पकेत्यादौ तज्जायार्थकर्तृकदेशे हतोयथा विषयितेन पाकादिक्रियान्वेतीत्यर्थः इदं तद्वोध्यं जिज्ञासारूपाकांक्षायाः शाब्दधीहेतुत्वमजिज्ञासोरपि शाब्दबोधोद
यात्मगाणहता निराकृतं तथाचाकांक्षाविरहेन पदार्थैकदेशे पदार्थान्तरान्वयेबीजं गोनिमस्मा दोगवादिपदार्थैकदेशो गोत्वे नित्यादिपदार्थाभेदान्वयबोधप्रयोजिकायाः समा
नविभक्तिकतत्पदसमभिव्याहाररूपायाश्राकांक्षाया अभावात् नतु पदार्थानायाः स्वतंत्रतदुपस्थितेः पदार्थान्वयस्य तत्रान्वयबोधेहेतुताबाच्या एवं च ज्ञानविशिष्टाधिकात्मादि

पदवृत्तितादात्म्यान्द्रव्यमित्यादिवाक्यात्पदार्थैकदेशेज्ञाने द्रव्याभेदान्वयबोधवारणाय दंडजन्यो न दंडजन्य इत्यादिवाक्यात्पदार्थैकदेशे दंडजन्यत्वादौ दंडजन्यभेदान्वयबोधवारणाय च
कल्पनीयेज्ञानाद्यंशेऽतरान्वयबोधे स्वतंत्रज्ञानाद्युपस्थितेर्हेतुत्वे कार्यतावच्छेदककोटिप्रविष्टेतरविषयतायां विषयित्वादिसंबन्धावच्छिन्नप्रकारतामत्वं तद्विशेषणं देयं वस्तुतो ज्ञाना
दिविषयकशाब्दबोधे स्वतंत्रज्ञानाद्युपस्थितेर्हेतुत्वेपि पंचम्यादिजन्यज्ञानज्ञाप्यत्वोपस्थितिप्रकृतिजन्यस्यमाद्युपस्थितियोग्यताज्ञानघटितसामग्र्याः पदार्थैकदेशज्ञाना
दौ विषयितादिसंबंधेन धूमादिप्रकारकशाब्दबोधजननेबाधकाभावः तादृशसामग्र्याः स्वतंत्रज्ञानाद्युपस्थितेरनंतर्भावात्तादृशोपस्थितेर्ज्ञानादौ द्रव्याभेदाद्यन्वयबोधप्रयोजकसा
मग्र्यंतरेष्वेव निवेशः न चैवं स्वतंत्रज्ञानाद्युपस्थितेर्व्यभिचारेण हेतुत्वमेव न संभवतीति वाच्यं यत्तोयत्रैकरूपावच्छिन्ने पदे पदांतराकांक्षाग्रहीता ऽन्यरूपेण च वृत्तिर्गृहीता तत्रातिप्र
संगवारणाय तत्तदानुपूर्वीविशेषरूपपदविशेषत्वप्रकारेणागृहीतवृत्तिकपदजन्यतत्तदर्थोपस्थितेर्हेतुता वाच्या तथा सति तद्धर्मप्रकारेणाकांक्षादिग्रहसत्त्वे तद्धर्मप्रकारेणागृ
हीतवृत्तिकपदार्थोपस्थितेः परस्परसहकारेणैव फलजनकत्वोपगमे नोक्तातिप्रसंगवारणसंभवात् यावतामानुपूर्वीकपदजन्योपस्थितीनामेकविधशाब्दबोधे विभिन्नरूपे
णहेतुता व्यभिचारस्यावश्यकत्वेन तद्वारणवर्त्मनेव दर्शितव्यभिचारस्यापि वारणमिति एतेनजन्यत्वांशेऽतरान्वयबोधे स्वतंत्रजन्यत्वोपस्थितेः कार्यकारणभावे कार्यताव
च्छेदककोटिप्रविष्टेतरविषयतायां निरूपितत्वसंबन्धावच्छिन्नप्रकारताभेददर्शनस्तु भयपतिरुद्भ्रम्यथोपगवइत्यादौ तद्धितार्थापत्ये एकदेशे जन्यत्वे निरूपकत्वेन प्रकृत्यर्थान्वया
नुपपत्तेः ज्ञानज्ञाप्यत्वस्य पंचम्यर्थत्वानुपपत्तेः ज्ञानज्ञाप्यत्वस्य पंचम्यर्थत्वमते च स्वतंत्रज्ञानोपस्थितिजन्यतावच्छेदकज्ञानविषयतानिरूपितेतरविषयतायां विषयप्रकारता
भेदनिवेशानमपेक्षितमिति प्रत्युक्तं तदनिवेशेऽपि दर्शितरीत्या सामंजस्यात् वैयाकरणइत्यादौ तदर्थीतेतद्वदेवत्यनेनाभिहिततद्धितार्थस्यवेत्तरेकदेशेज्ञानेविषयतया प्रकृत्यर्थसा
न्वयोपपत्तेः उक्तस्थले विषयप्रकारताभेदानिवेशस्य सर्वमतएवावश्यकत्वाच्चेति प्रकृते गुणोऽपिस्वविरुद्धगुणत्वतरमाह यद्धर्मविशिष्टस्येति यद्धर्मविशिष्टः पंचमीप्रकृत्यर्थस्तद्धर्म
धिः तद्धर्मविशिष्टस्यैव ज्ञाप्यत्वमुपदर्श्यत इति तज्ज्ञानज्ञाप्यत्वस्य पंचम्यर्थतामते तद्धर्मविशिष्टस्यैव पंचम्याजनकज्ञानविषयत्वबोधनादिति भावः अन्यथा पंचम्याज्ञानजनकत्वेन

बोधितप्रकृत्यर्थज्ञाने विषयतेन विशेषणतामालंब्य विषयतासम्बन्धेन उपदर्शनसंगमने यथार्थधूमो ज्ञानादिति प्रयोगेपीति तत्रापि मानुपस्थितज्ञाने पंचम्यर्थज्ञापकत्वान्वयोन धूमादेर्ज्ञा
पकज्ञानविषयतासामान्येन धूमज्ञानादेर्व्याप्यत्वप्रदर्शनस्मात् धूमस्मानेन च ज्ञाप्यत्वस्यैव पंचम्यर्थतया धूमज्ञानज्ञानस्यैव तत्र ज्ञापकत्वं प्रतीयते न तु धूमज्ञानस्येति नातिप्रसंग इति न च पंचम्याः
केवलज्ञाप्यत्वार्थकत्वमते धूमस्येव लज्ञानपदस्य लक्षणार्थज्ञानविषयकज्ञानपरत्वान्वयार्थस्य धूमादिज्ञाने मुख्येऽपर्यवसितज्ञापकतालाभ इति न धूमादेर्व्याप्यत्वोपदर्शने प्रसंग इति वाच्यम् मु
ख्यार्थपरत्वे बोधकविरहे तत्तात्पर्येणापि प्रसंगसंभवात् न हि यत्र पदार्थान्तरे निरूढलक्षणा शक्त्युपस्थापितोऽर्थस्तेन न बोध्यते तद्धीयापृथिव्या काकादिस्तत्वेसामग्रीबलेन तद्बोधसम्भ
वोऽस्त्वात् अथ तत्र शक्यार्थबोधस्यापि संभवेन तत्रापि कस्यचित् कदाचित्तात्पर्यसंभवेऽपि तथापि तज्ज्ञानादितात्पर्यविरहात्तत्तात्पर्येण स्यात्तत्पदप्रयोगसम्भव इति चेन्मा भून्नाम त्वार्थ
तात्पर्यज्ञानपदघटितयथार्थधूमज्ञानादिस्यादिवाक्यस्य तदापत्स्यान्याप्यत्वे तथापि ज्ञाप्यत्वमात्रस्य पंचम्यर्थत्वे न्यायाने तर्गतस्य ख्यार्थपरज्ञानपदघटितयथार्थधूमज्ञानादितिवाक्यस्य
धूमादेर्व्याप्यत्वाकांक्षाप्रयोजकधीजनकत्वं दुर्वारमेव तच्चानुभवविरुद्धं न च ज्ञानज्ञाप्यत्वे पंचम्या लक्षणापदे वा केवलज्ञाप्यत्वे स्वारसिकलक्षणोपस्थितेन धूमज्ञानेनाज्ञानजनकत्वबोध
संभवादुक्तातिप्रसंगोऽदुर्वारस्तत्रेष्टापत्तौ च प्रकृतेपीष्टापत्तिसंभव इति वाच्यं स्वारसिकलक्षणया पंचम्युपस्थापितविषयत्वादिरूपार्थान्तरस्य तत्र तादृशज्ञाप्यत्वे विप्रकृष्टस्यान्वये श्रीकाद्वा
यामयानभ्युपगमात् धूमज्ञानादित्यतो धूमज्ञानस्य ज्ञापकत्वाबोधनादिति भावः यत्तु धूमज्ञानादित्यतो लक्षणयोपस्थापितधूमरूपविशिष्टज्ञानज्ञाने ज्ञापकताभाने ज्ञापकज्ञानविष
यत्वं धूमज्ञान इव तद्विषयधूमेपि भासत इति प्रकृतेऽलीकस्वाणिकतामनेन च धूमे व्याप्यत्वाकांक्षानपातदुपदर्शनप्रसंगोऽदुर्वार इत्याशयवर्णनं तदसत् तथापि समस्तेपि तद्दोषस्य दुर्वारत्वात् पंच
म्यर्थैकदेशे ज्ञाने मुख्यार्थधूमत्वरूपविषयविशिष्टज्ञानान्वयेपि धूमे ज्ञापकज्ञानविषयताबोधस्य दुर्वारत्वात् न च तथापि पंचमी प्रकृत्यर्थीनोपस्थितिविशेष्यत्वं यस्मात्तस्यैव व्याप्यादि
कं प्रदर्श्यत इति नियमस्य स्वयमनुपगमात्तत्समते दर्शितातिप्रसंग इति वाच्यं तत्र धूमादेर्ज्ञापकज्ञानविषयताबोधादाकांक्षासंभवे तादृशनियममनुरुध्य व्याप्याद्युपदर्शनस्यानपवादा
त् वस्तुतो लिंगज्ञानप्रकृत्यर्थपंचम्यर्थयोर्वा तर्भवद्भयथा धूमज्ञानपदवसाप्य ज्ञापकतावच्छेदकपदार्थतावच्छेदकावच्छिन्नविषयतानिरूपितप्रकारता लभ्यते सैव तस्य व्याप्यादिनिर्वाह्याऽतो

ग॰टी॰
प्र॰वं॰
७४

ननत्र तदाकांक्षेति धूमादित्यादिप्रयोगे धूमवत्त्वादाविव धूमवत्त्वादिसत्त्वस्य मादौ व्याप्त्यादेर्नोपदर्शनमिति मूलोक्तलक्षणे पक्षयालक्षणिप्रतिज्ञाद्यवयवलक्षणानि स्वयमाह इतरान्वि
तेति प्रथमसत्त्वं तस्य हेतूपनयनिगमनसाधारणस्योदाहरणव्यावर्तनस्य स्वयमेव दर्शयिष्यते प्रतिज्ञाहेतोरित्यादिना इतरान्वितत्वस्य भिन्नावयवार्थान्वितत्वस्य वयवघटकपदोपस्था
पितार्थान्वितत्वं चा एवं च स्वेतरावयवसहकारेण घटकपदसहकारेण वा बोधकत्वं तत्समुदायार्थः तेनोदाहरणबोध्यार्थप्रविष्टसाध्यादेः प्रतिज्ञादिजन्यबोधे इतरान्वितत्वेपि न क्षतिः
द्वितीयसत्त्वं तान्ने तु प्रथमत्रिमन्यायावयवत्वमिति संबध्यते द्वितीयसत्त्वं तच्च हेतूपनयनिगमनवारकं हेतुजन्ये तस्मादित्येभ्यो भिघतृइत्यादि निगमनजन्ये च बोधे विभक्त्यर्थस्य विशेष्यतया
विवक्षणीयविभक्त्यन्तपदार्थविशेष्यकत्वविरहात् वह्निव्याप्यधूमवांश्चायं तस्माद्वह्निमानित्याद्युपनयनिगमनजन्यबोधे च विभक्त्यन्तपदमध्ये तदंत्यस्य तेदं पदमनन्वयान्तपदार्थयोरेव विशे
ष्यतया समभिव्याहृतपदार्थविशेष्यकत्वविरहात् अन्त्यत्वं च स्वघटकपदेषु चरमत्वं उपनयादिस्थ दमादिपदानामपि न यत्नासामान्यमध्ये चरमत्वेन उत्तरमप्यन्यवाक्यघटकपदेष्वादि
त्यतः स्वघटकत्वं पदविशेषणं एवं च निगमनघटकपदेषु चरमं तदेतोपनयस्य दंपदार्थविशेष्यकं बोधं प्रत्युपनयसहकारेण जनके निगमने तादात्म्येन इत्यादि साध्यके दृष्टपक्षण
कर्मान्यत्वे सति तत्त्वादिस्यादौ स्वघटकविभक्त्यन्तपदेषु यद्धूमवत्त्वादित्यादिपदं तदन्त्यविभक्त्यन्तप्रतिज्ञास्थ द्रव्यादिपदार्थविशेष्यकान्वयबोधजनकेति न तावतीव्याप्तिवारणाय स्वीयत्व
मत्समभिव्याहृतपदविशेषणं अत्र स्वत्वं च स्वस्वकारेण लक्षणव्यक्तीनां निवेशादननुगम इति योगिनिसत्वनिवेशपलक्षणं तस्मात् अन्त्यपदवत्त्वं इति अत्राप्युदाहरणवारकं प्रथमसत्त्वं तमन्त्यत्वज्ञ
ते द्वितीयसत्त्वं तु वैकल्पिकं सत्त्वं तच्च धूमादित्यादिहेतौ विभक्त्यन्तावयवप्रतिज्ञाघटकपदमात्रघटितत्वं तस्योदाहरणस्यापि तस्य निर्वचनेप्यसमभिन्नविभक्त्यन्तस्वीयपदाप्रसिद्ध्या स्वपदे
नान्यस्यैवोपादेयं तथा स्वीयान्त्यपदार्थविशेष्यकशाब्दबोधजनकं यत्तदन्यत्वमसत्त्वादतिव्याप्तिरतो स्वपदवत्त्वसमनीति अन्त्यपदवत्त्वं च स्वघटकपदोत्तरपदाघटितत्वं तदन्यत्वं न तु स्व
घटकपदोत्तरपदवत्त्वं लक्षणीभूतप्रतिज्ञाव्यक्तीनां स्वत्वेनानुपादेयतयाननुगमतादवस्थ्यात् अन्त्यपदवतो हेतुविशेषस्योपनयनिगमनयोस्तद्धेतोः स्वीयान्त्यपदार्थविशेष्यकबोधाजनक
योस्तदन्यकयोस्तदन्यत्वासत्त्वान्नातिव्याप्तिः न चोपनयघटकान्त्यपदार्थहेतुपदादिविशेष्यकबोधजनकतदेकदेशमनुवेतादिपदस्य तद्घटितसमुदायात्मकोपनयादावसत्त्वात् तादृशबो

७४

याजनकं संनोपनयादिकमिष्यतिआमिति नि वाच्यं तादृशबोधजनकत्वं यादृशसमुदायवृत्तितादृशसमुदायदपत्सभिन्नत्वनिवेशो नानतिप्रसंगात् उपनयाद्येकदेशवृत्ति तादृशबोधजनकताया इदमा
दीनपदवृत्तितसमुदायावृत्तितयानदेतपदसमुदायात्मकोपनयादेस्तादृशसमुदायात्मकत्वेनतद्भिन्नत्वाभावात् तादृशसमुदायभिन्नत्वघटितभेदानुयोगितावच्छेदकावयवतावच्छेदकरूपवत्त्वमतः
समुदायघटकप्रत्येकसकलभागेषुसमुदायभेदसत्त्वेपिनातिप्रसंगः इदमेववतीतिरूपवाक्यान्तरभेदवृत्तिनलक्षणेनेरपिचोच्या पृथिवीतरेभ्योभिद्यतइत्यादिनिगमनेसवघटकविभक्त्यंतपदमध्येयदत्व
थानुपदंतत्तस्माद्या तादृशविशेष्यकबोधजनकतयामतिव्याप्तिमित्यभिन्नपदस्यविभक्त्यंतरूपताविवक्षणेनवारयति पदमिति निगमनइति निगमनपदंनिगमनविशेषपरं अन्यपदघटितेहेतिमत्व
रूपपदवत्त्वनिवेशेतु नरूपनयनिगमनयोरेवातिव्याप्तिः स्यात् उपनयघटकायपदनिगमनघटकसमुच्चयपदयोरनेतद्घटकविभक्तिसत्त्वेनास्यभिन्नत्वादतस्तत्रविभक्त्यंतपदमेवनिवेश्यमितिभाव इ
तिकेचिद्व्याचक्षते तन्नमनोरमं तथाहि स्वघटकविभक्त्यंतपदमध्येनाम्निःसम्यकोर्थः स्वघटकविभक्त्यंतपदप्रागभावासमानकालीनविभक्त्यंतपदमितिचेत् उपनयस्येदमादिपदस्यविभक्तेः
तपदप्रागभावसमानकालीनतयातस्यासत्त्वनिर्वाहायप्रथमविभक्त्यंतत्वविशेषणमस्तु चरमविभक्त्यंतत्वविशेषणमनर्थकं तद्विषयमेवेतिचेत् तर्हि प्रनत्येत्वस्याविभक्त्यंतपदप्रागभाव
समानकालीनत्वपर्यवसितभिन्नभिन्नत्वनिवेशस्यैवेष्टस्य एवं च तस्माद्विघ्नइत्यादिनिगमनस्याव्याप्तिः पदस्मान्नस्त्वमेव नास्तिकिमनस्यपेदविभक्त्यंतत्वनिवेशनेनेति वस्तुतस्तु तस्मान्ने
तरारणीस्पान्दोनिगमनेविभक्त्यंतेतरपदप्रागभावसमानकालीननञ्पदार्थविशेष्यकशाब्दबोधजनकः तिप्रसिद्धेवलक्षणस्यपदपदस्य विभक्त्यंतपदपरता वारिता अथनञ्पदस्यापिप्राति
पदिकत्वेनविभक्त्यंततयाविभक्त्यंतत्वविशेषणेनदुर्वारता नचनिपातस्यविभक्तिप्रकृतिकत्वनस्वीक्रियतेतदर्थेनविभक्त्यर्थानन्वयात् स्वराद्यव्ययार्थेचानुसन्धीयमानलुप्तविभक्त्यर्था
न्वयोनतादृशतादृशान्वयोपात्तरमेव विभक्तिस्वीकारस्यावश्यकत्वात् नञोऽसत्त्वत्वेपिनञितितत्पुरुषविधायकसूत्रसामर्थ्यादेवतेनसहसमासोभविष्यतीतिवाच्यं विभक्तेर्निपातार्थान्वि
तार्थबोधकत्वेपिनिर्विभक्तिकप्रातिपदिकस्यासाधुतयासाधुतायाविभक्तेरावश्यकत्वात् नञोसत्त्वत्वेननञितितत्पुरुषविधायकसूत्रसामर्थ्येनतेनसहपदांतरस्यतत्पुरुषसमर्थनेपि
बहुव्रीह्यव्ययीभावयोरनुपपत्तेश्च संवतत्वेपिसमासप्रविष्टप्रतियोगिपदार्थानुरागेणनञोभावबोधकतयातत्सापेक्षत्वेनासामर्थ्यान्नतेनसहद्वंद्वइतिचेत्तस्य विभक्त्यंतत्वमन्यथा
हृदबोधोपयिकविभक्तिप्रकृतित्वपर्वतोवह्निमानित्यादावप्रतिज्ञास्थपर्वतादिपदोत्तरस्त्वविभक्तेरर्थविशेषपरताविरहेप्यभेदान्वयबोधानुपयोग्याकांक्षानिर्वाहकसमानविभक्तिकतासंपाद

कत्वेनपक्षहेतुबोधोपयोगितानतुनिपातोत्तरविभक्तेरितिनातिव्याप्तिः अवटादिपाहे नयत्र प्रतिज्ञार्थांशतटभिन्नादिरूपपदनिर्देशास्तत्र ननादेर्निरुक्तविभक्त्यन्तताविरहेपि विशेष्यीभूतविशिष्ट
पक्षबोधकोऽवटादिपदस्य तादृशविभक्त्यन्तत्वाल्लक्षणसमन्वयः यत्र यादृशपदोत्तरं कदाचिद्विभक्तेः श्रवणं न देव विभक्त्यन्तपदेन विवक्षितं तदव्ययादिपदोत्तरमप्यमेकवचनाक्रान्तावपि हि व
चनादिप्रकृते हेत्विद्वान्वह्निमान्त्यादिप्रतिज्ञासत्त्वदशायां तेन तत्र यत्नवाचकस्वरादिपदघटितप्रतिज्ञायामव्याप्तेर्निगमनवारणायेति इतरान्वितस्वार्थबोधकत्वाद्यावयवत्वमात्रनिवेशउपनयार्थान्वितस्वा
र्थबोधकत्वयानिगमनातिव्याप्तिः स्यात्तद्वारणाय स्वार्थे यद्यपीतरान्वितस्वार्थबोधकत्वं निगमनवत्प्रतिज्ञोपनययोरपि तथापि विशेष्यतयान्वितत्वनिवेशानेनतद्वारणसंभवान्निगमन
मात्रकथनं यद्यपि निगमनसमुदायार्थः पक्षपदान्वितीतिसाध्यान्वितस्वार्थबोधकत्वनिवेशापि प्रायशो निगमनकारणसंभवस्तथापि यत्र साध्यस्य प्रमेयत्वाभावादेव पक्षतानतत्र निगम
नेतिव्याप्तिवारणाय पक्षान्वितस्वार्थबोधकपदोपस्थापितार्थान्वितत्वनिवेशनेपक्षान्वितस्वार्थबोधकत्वे पक्षतावच्छेदकावच्छिन्नविषयतानिरूपितस्वार्थविषयताप्रयोजनकत्वं यथाश्रुतेउप
नयस्यपक्षवाचकेदंपदस्य वसत्त्वगत्यादेनपक्षत्वहेतुस्त्वोषः पक्षस्तबोधकत्वेनप्रामाण्यमयः पर्वतइत्यादिवाक्यान्मामाण्यमयत्वादिरूपेणपक्षतावच्छेदकावच्छिन्नसंसर्गेनयाप्रतीयमानोयः पक्षताव
च्छेदकावच्छिन्नस्तद्बोधकत्वेन चतदुपस्थापितार्थान्वितस्वार्थबोधके निगमनेऽतिव्याप्तेर्वारणात् तादृशपदोपस्थापितार्थान्वितस्वार्थबोधकत्वं च तादृशपदप्रयोज्यविषयतानिरूपितस्वप्रयोज्य
स्वार्थविषयताकत्वं यथाश्रुते निगमनताप्यन्वयिनपर्वतपक्षतावच्छेदकावच्छिन्नस्यपर्वतो नीलपर्वतइत्यादिवाक्यस्य पक्षतावच्छेदकावच्छिन्नविषयतानिरूपितविषयताप्रयोजकनीलपर्वतप
दोपस्थाप्यत्वेन निगमनातिव्याप्तेर्दुर्वारत्वात् पक्षतावच्छेदकावच्छिन्नविषयतानिरूपितायाविषयतायान्निरूपितविषयताप्रयोजकत्वपर्यन्तार्थः पक्षतावच्छेदकावच्छिन्नत्वानिवेशोव्याप्यत्वा
वच्छिन्नायापक्षविषयतायान्निरूपितोपनयस्थदेपदप्रयोज्यविषयितानिरूपितविषयताप्रयोजकत्वमादायनिगमनप्रवातिव्याप्तिः स्यादितितन्निवेशः अयन्निवेशोपिपक्षतावच्छेदकावच्छिन्नाया
उपनयस्थेदंप्रयोज्यविषयतानतन्निरूपितनिगमनार्थाविषयतानिरूपितोपनयार्थविषयनेवेत्युपनयेतिव्याप्तिः नचचरमविषयत्ताप्रकारत्वस्साविवक्षणीयाऽतोनायमतिप्रसंगइतिवाच्यम् एव
वेसति प्रमेयत्वमभिधायप्रमेयत्वादिसत्त्वपक्षान्वितपंचम्यर्थविशेष्यतयान्वितसाध्यरूपार्थमादायप्रतिज्ञातिप्रसंगात्प्रसक्तेर्मेयत्वमभिधेयमित्याद्युदाहरणे ग्रंथानुस्यूतेः एवं प्रमेयत्वमभिधे
यं प्रमेयत्वादित्यत्र प्रतिज्ञातिव्याप्तेरेकदेशार्थविषयताव्याहतस्वार्थविषयतानिवेशेन वारणेपि तत्रमनिगमनेऽभिधेयत्वव्याप्यप्रमेयत्ववानयमित्युपनयार्थप्रमेयत्वत्वरूपपक्षतावच्छेद

कारूपहेतुतावच्छेदकावच्छिन्नान्वितताहृशपदतावच्छेदकावच्छिन्नेस्वार्थान्वयबोधकेः तिप्रसंगो दुर्वारः एततावच्छेदकावच्छिन्नेन तद्विशेषणतयान्वितत्वनिवेशे प्रमेयत्वमित्याद्यपि मयं
घटाद्यन्वयितेः एवं च साध्यहेतुत्वस्य विशेष्यत्वेनैव पदान्वयित्वेन प्रतिज्ञाति व्याप्यप्रसक्तेः विशेषणतया किंचिदन्वितत्वनिवेशेनैवोपपत्तेः प्रकृतपदनिवेशवैयर्थ्यापाताच्च निगमनार्थस्य
विशेषणतया किंचिदन्वितेनैतद्येन तत्राति व्याप्तेरत्तमनिवेशापि वारणसंभवात् एवम् शुद्धपदतावच्छेदकावच्छिन्नान्वितत्वनिवेशवैयर्थ्यापातात् प्रसंगहृदयवारणसंभवात् उपनयार्थव्याप्य
विशिष्टपदान्वयिनो निगमनार्थस्य शुद्धपदतावच्छेदकावच्छिन्नान्वयित्वेन तदन्वितार्थकोपनये शुद्धपदतावच्छेदकावच्छिन्नान्वितार्थकपदोपस्थापितान्वितार्थकत्वविरहात् प्रमेयत्व
मभिधेयं प्रमेयादित्यत्र व्याप्तिविशिष्टप्रमेयत्वरूपपदतावच्छेदकावच्छिन्नपदे तत्समयोन्वयेन तदन्वितार्थकमिति निगमने निरुक्तरूपविरहात् एतेन पक्षसाध्ययोरभेदस्थले निगमनार्थघटकसा
ध्यरूपपदान्वितेऽपदार्थान्वितार्थकतया निगमनाति व्याप्तेरपि नावकाशः एतत्वेकविषयतापन्नस्य यत्रापरविशेष्यतानतद्विशेष्यत्वविशेषणत्वरूपविषयतयोरभेदेन पक्षविषयतानिरू
पितविषयतानिरूपितसाध्यविषयतानिवेशोद्देश्यमात्रपर्वलक्षणाद्युपपत्तेः पक्षविषयतानिरूपितसाध्यीयप्रकारत्वरूपविषयताहेत्वर्थप्रकारतयानिरूप्यनिरूपकभावविरहात् अतः प
क्षविषयतानिरूपितविषयतावच्छिन्नविषयतानिरूपितसाध्यविषयतैव निवेशनीया एवं चोक्तरीत्योपनयाति व्याप्तेरनवकाशः पक्षविषयतानिरूपितनिगमनार्थनिष्ठप्रकारतारूपविषयतानि
रूपकतन्निष्ठविषयतायाश्च भेदेनावच्छेद्यावच्छेदकभावविरहात् एवं क्रमेणापक्षसाध्ययोरभेदस्थले निगमनातिव्याप्तेरपि नावकाशः एवं हेतुपक्षयोरभेदस्थले निगमनातिव्याप्तिरपि समाहिता
हेतुप्रकारतायाः निगमनार्थप्रकारतायाश्च स्वमर्थनिष्ठविशेष्यतारूपविषयतायाश्च भेदेनावच्छेद्यावच्छेदकभावविरहादिति नन्वेकविशेषणतापन्नस्य यत्र विशेषणता तत्र विशेष्यताप्रकारतयोर
भेदे बाधकविरहेण लाघवेनैवोपगमात् नन्ववच्छेद्यावच्छेदकभावापन्नविषयताद्वयस्य यदि चैकविशेषणतापन्नस्य यत्रापरविशेष्यतास्थले प्रकारताविशेष्यतयोरभेदं दंडिपुरुषवानित्युदेः
पुरुषादिनिष्ठप्रकारतानिरूपितदंडादिविशेष्यताया अलित्वदुर्वारमिति तस्याः पुरुषेण दंडीत्यादिसमायाविरोधिताप्रसंग इति तद्भेदः समृतानेवनविषयतावैलक्षण्यापत्तयोरवच्छेद्यावच्छेदक
भाव एव स्वीक्रियत इति मन्यते तदा हेतुपक्षयोरभेदस्थले निगमनार्थधर्मितावच्छेदकहेतुप्रकारतानिरूपिताया निगमनार्थप्रकारतानिरूपितायाश्च विशिष्टहेतुत्ववच्छिन्नायाः तदुपनयार्थविशेष्य
तायाएवैकहेतोर्हेतुधर्मितावच्छेदकतापत्तिरित्यवच्छेद्यावच्छेदकभावापन्नविषयताद्वयस्वीकारेणापि तयात्रत्र निगमनातिव्याप्तेर्दुर्वारत्वात् स्वार्थैकदेशस्यापि स्वार्थत्वाभिमानमूलाप्रति

ज्ञाविशेषाति व्याप्तिर्यां कां स्वार्थपदस्य शक्तिमाद्य तत्पर्याप्त्यधिकरणविशिष्टार्थपरतां स्वरूपस्य निराकरोति प्रमेयत्वामिति न प्रतिज्ञातार्थः साध्यविशिष्टपक्षस्वरूपपक्षदेशार्थमात्रः साध्यमात्रः प्रद्यपि प्रमेय
त्वमभिधेयं प्रमेयत्वादित्यादित्यादिन्यायांतनिगमने हेतुमत्तपदान्वितस्वार्थबोधकेदंपदोपस्थापितपदान्वितस्वार्थबोधकत्वे निगमनेऽव्याप्तमिति विशेषणतया पदान्वितत्वाविवक्षणीयमिति कथित
स्थलेपंचम्यर्थः पदेन विशेषणमिष्यते नो कप्रतिज्ञायामतिव्याप्तिसंभवः तथापि निगमनार्थैकदेशस्य ज्ञापकत्वान्न यापद(?)स्यता हृशार्थान्वितया निगमने प्रतिप्रसंगवारणाय स्वार्थपदस्य स्वप्रतिपा
द्यविशिष्टार्थपरतायाश्चावश्यकत्वात्कथितस्थलेपंचम्यर्थान्वितस्वार्थबोधकत्वाभावेनाप्यतिव्याप्तिवारणसंभवात्कथमंके वलेनहेत्वावाक्येनपंचम्यर्थविशेष्यकान्वातरवाक्यार्थबोधोजन्यते तत
श्च प्रतिज्ञास्थवह्न्यादिपदस्य प्रकारेणाधूमज्ञानजन्यो वह्निविरा(?)कारकस्वार्थविशिष्टबोधोजन्यते ततः समुदितप्रतिज्ञासंस्कारेण पदस्वार्थविशिष्टसाध्यवैशिष्ट्यबोधः प्रसेकमेताहृषबोधत्रयज
नकता घटितलक्षणत्रयमाह स्वार्थेति विशिष्टवैशिष्ट्येति स्वतात्पर्यविषयबोधीयविशेषणतावच्छेदकस्वार्थबोधजनकस्यायावयवत्वमित्यर्थः तेन निगमनार्थान्वितोपनयार्थबोधस्यापि निग
मनार्थैकदेशविशिष्टवैशिष्ट्यबोधतया निगमनार्थबोधस्य तज्जनकत्वेन यथाश्रुतलक्षणस्य निगमनेऽतिव्याप्तिरिति दूषणं प्रसक्तं विशेषणतावच्छेदकतायाश्च व्यावर्तकत्वात्स्वतात्पर्यविषयबो
धीयत्वं न हि शेषणं विशिष्टबोधेति स्वतात्पर्याविषयबोधजनकतावच्छेदकस्वार्थप्रकारताशालिबोधजनकस्यावयवत्वमित्यर्थः तेन निगमनार्थविशिष्टोपनयार्थज्ञानस्य निगमनार्थविषयक
त्वेन ताहृशज्ञानस्वरूपयोग्यत्वेपि न निगमनातिव्याप्तिः लक्षणत्रयमेव हेतौ संगमयन्नवयवांतराध्यावर्तयति पक्षवाक्यतयेत्यादिना इतरोपस्थापितेति स्ववटकपदोपस्थापितेत्यर्थः स्वार्थत्वस्व
जन्यप्रतिपत्तिविशेष्यत्वमतो निगमनजन्यप्रतिपत्तिविशेष्ये तद्घटकपदोपस्थापितसाध्यविशेषणकस्य निगमनस्य वारणायोपस्थापितांत अत्र लक्षणेऽङ्गतरार्थप्रकाशकस्वार्थविषयताकत्वेन हि
तौ येवस्वार्थांशेऽतरप्रकारकत्वेन बोधस्य निवेशान्नेदः अवयवार्थेति अवयवजन्यप्रतिपत्तिविशेष्यविशेष्यकस्वार्थप्रकारकबोधजनकावयवत्वमर्थः सर्वेषामेवावयवानां स्वार्थघटकविशेष्या॰
श स्वार्थघटकार्थीन्तरप्रकारकबोधजनकतयातिव्याप्तिवारणाय स्वार्थप्रकारेति प्रतिज्ञार्थघटकसाध्यरूपविशेषणे हेत्वर्थस्यान्वयेपि विशेष्येपंचैतदनन्वयात्प्रतिज्ञायां नोपनयलक्षणातिव्याप्तिर्निबो
हेतौ निगमनलक्षणातिव्याप्तिः उपनयलक्षणे स्वार्थपदस्य निगमनलक्षणे चावयवार्थपदस्य विशेष्यपरत्वादित्याह हेत्वर्थस्येत्यादिना उक्तप्रायमिति सर्वे हेत्वर्थैकदेशपंचम्यर्थपक्षदेशमात्रान्व
यित्वमुक्तं अत्र हेतुसमुदायघटस्य तथात्वमिति विशेषात्प्रायमिति प्राह्वो(?) नित्यः तामास्मवत्वे सति वाक्यकरणकप्रत्ययत्वादिनि प्रयोगे हेतुघटकदलयोः प्रत्येकव्यभिचारितया भेदेन नामार्थयोस्तयोरे

कं शेषपरस्परविशेषणतयानन्वयेन विशिष्टे हेतुत्वान्वयासंभवेन विशेष्यविशेषणभावानापन्नयोर्मिलितयोर्हेतुत्वान्वययोरेकं शेषपरस्य विशेषणतया नन्वयेन च विशिष्टे हेतुत्वान्वयासंभवे
न विशेष्यविशेषणभावादिति केचित् स्वविषये समाधानं तु पूर्वमस्मिन् पक्षे हेतुग्रन्थे सामान्यवत्त्वमिति सामान्यवत्त्वस्य वाच्यकरणकप्रमात्वे विशेषणत्वासंभवेऽपि समानाधिकरणत्वेन सामान्यव
त्त्वसामानाधिकरण्यस्य नान्वयविशेषणतया नाहत्वाविशेषणत्वं किन्तु वाच्यकरणकप्रमात्वे विशेषणत्वासंभवात् प्रामाण्यार्थकत्वेन स्यात् तत्रेति सामान्यवत्त्वस्य वाच्यकरणकप्रमात्वविशेष
णीभवत्सामानाधिकरण्यप्रतियोगिन्यस्थिताविसर्गः अथ सामानाधिकरण्यसम्बन्धेन ह्यासनात्कथमेतत्सतीस्यसवाक्यार्थ इति चेन्न यस्य च भावेन भावलक्षणमिति सूत्रात् शिष्टयासम
म्यागो दुह्यमानायागतः तत्वादौ पयाने दोहनादिसमानकालीनत्वमागमनादौ बोध्यते तेन यथा च प्रकृतेऽपि समानदेशत्वप्रत्यापनात् न च ताहृशसप्तम्याः क्रियायाः समानकालीनत्वक्रियासम
न्देशत्वस्य क्रियायाः कदाचित्समापन संभवः यस्य क्रियया परस्याः क्रियायाः लक्ष्यते विशेष्यते यद्वाचकपदसमभिव्याहृतकृदंतोपस्थापितक्रियासमानकालीनत्वादिसंबन्धेन क्रियान्तरविशे
षणमिति यावत् तद्वाचकपदात्सप्तम्यर्थकत्वात्ताहृशस्तत्र सा क्रियासमानकालीनत्वादिक्रियान्तरविशेषणतया विवक्षिते ताहृशस्य तत्र सप्तमीविधानात्र सप्तमीप्रकृत्यर्थेति रूपितसा
मानाधिकरण्यादेरपरत्रानार्थविशेषणतया विवक्षणे सप्तम्यनुशासनात् सामान्यवत्त्वसामानाधिकरण्यस्याप्रमत्वे उक्तो लाभ इति वाच्यम् यथा गोषु दुह्यमानास्वागतः इत्यादौ गोपदो
त्तरसप्तम्याः समभिव्याहृतक्रियायोगदोहनरूपार्थात्तत्र समभिव्याहृतकृदंतार्थविशेषितप्रकृत्यर्थस्य कर्मतानिरूपकत्वसंबन्धेनान्वयः तस्याः समानकालीनत्वसंबन्धेन क्रियान्तरेऽन्वय इति
तत्र दुह्यमानागोकर्मकदोहनसमानकालीनत्वलाभः तथा प्रकृतेऽपि सप्तम्यप्रकृत्यर्थानोराधारत्वमर्थः अत्रास्ति घटः इत्यादौ एतादृशादि आधारताप्रतियोगी घटः इत्यादिप्रतीतेः तत्र चाधार
त्वरूपक्रियाऽऽधारतायाः प्रमत्वे समानदेशत्वसंबन्धेनान्वय इति प्रमत्वे सामान्यवत्त्वसामानाधिकरण्यलाभसंभवात् भावलक्षणमिति भा
वाद्यस्य धर्ममात्रपरतया प्रमत्वस्य क्रियात्वविरहेऽपि तत्र स्यथाऽध्याहारेण वा प्रमत्वस्य तस्य सामान्यवत्त्वस्य समानदेशत्वलाभे न सामंजस्यात् कुत्रचित्समानकालीनत्वं क्रियायाः संबन्धः कु
त्रचित्समानदेशत्वमित्यत्र किं नियामकमिति चेत् यत्र समभिव्याहृतक्रियाया वर्तमानत्वेन तात्पर्यं तत्र समानकालीनत्वं यत्र च न तद्विवक्षा तत्र समानदेशत्वसंबन्ध इति नियमात् प्रकृते च वर्तमान
त्वमविवक्षितं समानदेशत्वलाभात् वर्तमानत्वाविवक्षायामपि विरोधिकालाविवक्षायां लटः साधुत्वात् यत्र चातीतत्वमनागतत्वं वोक्तं तावविवक्षितं दुग्धा अदोग्ध्य व्याख्यास्यमानदोतत्र न उत्तर

ग॰ टी॰
अ॰ व॰
२७

त्वं सर्वत्वं च सत्त्वन्यूनतिदोषनोत्तरत्वादिकमेव प्रतीयते न समानकालीनत्वमित्यवधेयं न च दाहरणे तत्सद्धेतुकिप्रयोनिकायामतानसत्वमतानसाम्यत्वादिना वकार्यवत्साध्यनाधिकरणप्रस्था
पनेकारूपवीसायाः किंप्रयोजनं न हि साध्यनस्थयावदधिकरणे साध्यवत्त्वज्ञानमनुमितिहेतुर्येन तस्य देवीसादिनायावद्व्यधिकरणानुपस्थापने तत्तद्देन तावतामधिकरणानां प्रसाम सर्वासंभ
वात् सकलसाधनाधिकरणे साध्यवत्त्वाप्रतीतेरनुमित्यनिर्वाहः स्यादिति यत्तदेन तावतामधिकरणानां बोधो वीसाप्रयोजनं भवेत् न च बासिप्रस्थापनेकावीसा तस्या व्याप्तिमिलोपयिकबो
धप्रयोजनमिति वाच्यं व्याप्ते मोहपत्त्वहाथितविरहेण तत्प्रस्थापनेकायामपि ग्राह्यतत्रत्यप्रस्थायोगात् मानसबोधे तत्करणमित्याद्युपयोगात् यदि चेयत्तदस्तमभिव्याहृतवह्न्यादिपदस्य
धूमादिव्यापकतावच्छिन्नवह्न्यादिलाक्षणिकतया धूमादौ वह्निव्याप्तिलाभः उच्यते सहायस्य हेतुकिंविनापितल्लाभसंभवाद्धेतुकिवैयर्थ्यमिति सा बोधेमाधीनसमायाननुपपन्नस्यात् इति चेत्तत्रैव
ति उदाहरणस्य यत्पदे चेत्सर्वः व्यभिचारवारणायेति वीसा तु हेतुप्रमान्तव्याप्तिज्ञानविरोधिव्यभिचारधीवारणप्रयोजिका माऽस्तु इत्यर्थः यावद्धेत्वधिकरणे साध्यवत्त्वनिश्चयेन तद्विपरीततानि
श्चयात् केनसाधनाधिकरणे साध्याभाववत्त्वरूपव्यभिचारग्रहस्य प्रतिबन्धकतेति भावः नन्वेवं वाच्यत्वादिसाध्यस्य पक्षोपायान्तरात् केवलान्वयिस्वगृहीतं प्रथमेतद्भिन्नः सत इति यावद्धर्मव
त्वादिमत्त्वाच्च हेतावेकमात्रवृत्तित्वं गृहीतं तत्र हेतौ साध्यसामानाधिकरण्यग्रहादेव मानसी व्याप्तिधीः संभवति प्रथमेऽभावे साध्यीयत्वाग्रहेण द्वितीये साध्याभाववत्त्वाग्रहे सामानाधिकर
ण्यं न हेतौ तत्र हेतौ व्यभिचारग्रहस्तं भवादित्युभयसिद्धव्याप्तिसाधकतानुमाने यत्पदोदाहरणे न प्रयुज्यते तथा तत्र सामानाधिकरण्यलाभायोदाहरणप्रयोगेऽपि हेतु यत्पदेन प्रयुज्यतेऽतएव तत्रेष्टा
पत्तिमाह यत्रेति सर्वत्रैव हेतुकिर्नोपेक्षितेति समन्तमाह वीसायामपीति प्रथमाध्यायः हि यत्पदयोगोऽपि सकलसाधनाधिकरणपरतया हेतुव्यभिचारनादवस्था व्यभिचारधियोऽस्तम्यरत्वयत्तोपदातायाचय
योगप्राप्यस्यात्साधनत्वस्य व्याप्तितात्पर्यमेवगम्यतां ततएव चलदलपाद्याभिशाहबोधयं संभवात्तत्र व्यभिचारशंकायाश्चविरोधित्वात् यावत्साधनवति साध्यवत्त्वबोधाय हि वचनमन्तरे एकमेव ग्रंतव
वयत्रैवं तत्रैवमिति प्राचामुदाहरणे पदर्शीतमपि संगच्छते आवश्यकस्य व्याप्तेः योहबोधः समानप्रकारतामपुरस्कृत्य विपरीतावियोविताया उत्कल्पनयामतानसत्त्वादिना सकलधूमाधिकर
णे साध्यवत्ताबोधेऽपि समवत्वप्रकारेण तत्र तत्रैव साध्याभावशंकाया मूलकेदेन मानसव्याप्तिग्रहासंभवात् एवमद्धेतुकेनापि यत्पदेन एकरूपेण विभिन्नरूपेण धूमाधिकरणोपस्थितिसंभवात्त
दर्थकतया हेतुकिसार्थक्यमपि दुर्घटं न च तत्तदुच्चरितत्वादिकं विरोधादेकस्यापि यत्पदस्यानेकाधिकरणबोधः संभवतीति वाच्यं सकृदुच्चरितस्य नानार्थतया बोधकतायामेवाकांक्षतेः सर्वना

ग॰ टी॰
अ॰ टे॰
२८

मंत्रांच कहिस्य नावच्छेदकतोपलक्षितधर्मावच्छिन्नत्वेन नानाधर्मिणामननुगमात् नानार्थेषु घानेकैकेनसमस्तेर्विरोधात् प्रमयाहिहेतुक्तिस्थले एकपदस्यैव पदद्वयरूपेणनास्थनितया पदभेदाविरहेण हेतुक्तादपि नानार्थबोधानुपपत्तेः कथं विदर्थहयबोधनिर्वाहे विभक्त्यर्थबोधस्य निर्वाहयितुमशक्यत्वाच्चेति अथ हेतुकस्थलस्यैव माशोनिरुक्तलक्षण अत एव घयम दप्रयोगेपि नवादिवाक्ये स्वारसिकलक्षणाविरहेऽप्यासत्तिबोधानिर्वाहः वस्तुतोव्याप्तिगोचरयाहबोधानुरोधेन न च डदाहरणप्रयोगास्तु दोपनयवद्व्याप्यपक्षे नैवोदाहरणेपि व्याप्तिबोध नेपुञ्ज्येतेति सकलधूमाधिकरणे साध्यवत्त्वबोधनाद्योयोधूमवानित्युदाहरणस्य चयत्तदस्य सकलधूमाधिकरणपरतायाश्चावश्यकतया हेतुकयत्तदत्तत्त्वानियमेन तत्त्वरत्वघ हार्थहेतुकेरावश्यकता एवं नित्यबोधस्य योग्यतिस्त्वेण हेतुक्ति विधानस्यानिसतयास कलधूमाधिकरणपरत्वेयत्तदस्याहेतुकस्य साधुत्वमेवन स्यादित्यतो हेतुकेरावश्यकतेसा धायेन यत्तदेहेतुक्तिमभ्युपेतत्तत्वदेहेतुक्तिं खंडयति वीसेति हेतुक्तिनियमोपि कदाचित्प्रत्तदेवन न तत्पदेत्यर्थः सर्वत्रैवतत्पदेन हेतुक्तिरितिचार्थः विवरणिभावससभूमिपाल इत्याहोकदोनुरोधादिना हेतुक्तिदर्शनात् न्यायेनुप्रयुज्यमानेऽपि क्वयत्स्यायतयासाधुत्वेपि न तत्र हेतुक्तिः सकलधर्मप्रत्यायनेकारूपवीसास्त्वेपितत्पदस्याहेतुकस्य साधुता संभवः मत्कविप्रयोगदर्शनादेतदपि स्पष्टयितुं तथाप्रयोगोदर्शयिष्यते हेतुकय त्तदवोधितनानाधर्मिणामेकेन तत्पदेनपरामर्शयोगत्वसामाकोनिरस्यति विद्रूपेति महानसमहान सामत्वादिविशिष्टप्रकारेणेत्यर्थः तत्पदेनपरामर्शात् तत्पदेनपरामर्शसंभवात् तत्पदस्यपरामर्शकतायाहिभुत्पत्तिविरोधेहेतुकय त्पदेनापितद्धर्मिबोधासंभवाद्युत्पत्तिविरोधएवनक थमित्याकांक्षायामाह वुद्धिस्थत्वाद्युपत्वादिति वुद्धिप्रकारावच्छिन्नेभसर्वेषेकधाक्तेरित्यर्थः व्युत्पत्तिविरोधेंहंष्टान्तेन द्रढयति ॥ अवयवटिप्पणी समाप्ता ॥ ॥ गदाधरभट्टरचिता न्यायावयवटिप्पणी वालहासेनाविदुषा विचिन्ता विदुषामुदे १॥



Form 20

PANJAB UNIVERSITY LIBRARY

1. Books may be retained for period not exceeding one month by Fellows, Members of the Faculties and Teachers of the University and Colleges and for not more than two weeks by other classes of members.
2. Books may be renewed on request at the discretion of the Librarian. This privilege does not apply to books issued with special permission of the Librarian, as well as periodicals.
3. In case the loan of the book is not renewed, failure to return the book in time will render the borrower to a fine from the date when book was due.
4. Dog-earing the pages of a book, marking or writing therein with ink or pencil, tearing or taking out pages, or otherwise damaging it will constitute an injury to a book.
5. **Any such injury to a book is a serious offence. Unless the borrower points out the injury at the time of borrowing the book, he shall be required to replace the book or pay its price.**

Help to keep the book fresh and clean.